क्षेषुहसंतीनान्वतिष्टत॥२६॥तामन्वगच्छद्भगवान्भवःप्रमुषितेंद्रियः॥कामस्यचवशंनीतःकरेणुमिवयूथपः॥२७॥
सोनुव्रज्यातिवेगेनगृहीत्वानिच्छतींस्त्रियं।केशबंधउपानीयबाहुभ्यांपरिषस्वजे॥२८॥सोपगूढाभगवताकरिणाकरिणीय
था॥इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा॥२९॥आत्मानंमोचयित्वांगसुरर्षभभुजांतरात्।प्राद्रवत्साप्रथुश्रोणीमायादेवविनिर्मिता ३०

[illegible] स्फुटंस्मितंतेनसहविसृष्टोवंचितःअतएवस्वयंयशस्त्रियाप्रेक्षणंतयाचप्रतिसमीक्षणंताभ्यांविह्वल
आत्मा [illegible] अनुव्रजंत्याःस्त्रियःलघुसत्सूक्ष्मंवासःससूत्रंकांचीसहितंतत्पदंतस्याःसमीपंययौविषज्जंत्यांकुचि
त [illegible] मायारणाया।केशग्रहेणानन्॥२७॥ ॥ श्री॥ ॥ ॥श्री॥ ॥ ॥ ९

स्ता० ... ।दिष्ठ... ...शित्सरःसु शैलादिषु च सन्निहितो बभूव। तदिह माय... जडीकृ... ...निशं प्रकृतिं कालेन सष्टा

२६ तस्... ...वि... ...रद्भुतकर्मणः। प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः॥३२॥ तस्यानुधावतो रेतश्चस्कंदामोघ
रे...तः सुष्मिनो यूथपस्येव वासितामनुधावतः ॥३३॥ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः। तानि रूप्यस्य हेम्नश्च क्षे
त्राण्यासन्महीपते॥ सरित्समुद्रशैलेषु वनेषूपवनेषु च॥३४॥ यत्र क्व चासन्नृषयस्तत्र सन्निहितो हरः स्कन्ने रेतसि सोप
श्यदात्मानं देवमायया॥ जडीकृतं नृपश्रेष्ठ संन्यवर्त्तत कश्मलात्॥३५॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः। अपरि
स्कं ५ ज्ञेयवीर्यस्य न मेने तदिहाद्भुतं। तमविक्लवमव्रीडमालक्ष्य मधुसूदनः। उवाच परमप्रीतो विभ्रत्स्वां पौरुषीं तनुं॥३६॥
मा॰ श्रीभगवानुवाच। दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मनास्थितः। यन्मे स्त्रीरूपया स्वैरं मोहितोप्यंग मायया॥३७॥ को नु मेऽतित
तांस्तान् रेन्मायां विषक्तस्त्वदृते पुमान्। विसृजंतीं भावान्दुस्तरामकृतात्मभिः॥३८॥ सेयं गुणमयी माया न त्वामभिभविष्यति। मया
समेता कालेन कालरूपेण भागशः॥३९॥ श्रीशुक उवाच। एवं भगवता राजन् श्रीवत्सांकेन सत्कृतः। आमंत्र्य तं परिक्रम्य स
गणः स्वालयं ययौ॥४०॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः। संमतामृषिमुख्यानां प्रीत्याचष्टाथ भारत॥४१॥ अयि
व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः अहं कलानामृषभोपि मुह्ये ययावशोन्ये किमुतास्वतंत्राः॥४२॥ यं माम
पृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै। स एष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः॥४३॥ श्रीशुक
उवाच। इति तेभिहितस्तात विक्रमः शार्ङ्गधन्वनः। सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः॥४४॥ एतन्मुहुः कीर्त्तयतोनुशृण्व २६
तो न रिष्यते जातु समुद्यमः क्वचित्। यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं॥४५॥ श्रीरामः॥

दिनिमित्तेन मया कालरूपेण भागशो रजआद्यंशेन समेतामदधीनां सती॥४३॥ ।अष्टाध्यायार्थनिगमनं इतीति। एतत्कीर्त्तनादेः फ

लमाह॥ एतदिति। भगताह्रतं भक्तपक्षपातं स्मरन्नुसत्करोति। असतामविषयं भावो भजनं तेन गम्यमंघ्रिं प्रपन्नान्। सिंधुमथ्यं सिंधो
र्मथने जातममृतं यः आशयन् अभोजयन्॥ इत्यष्टमे द्वादशः॥१२॥ ।त्रयोदशे त्वनुवर्ण्यंते सप्तमादीन्मनुक्रमात्। मन्वंतराणि स

असदविषयमंघ्रिभावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं॥ कपटयुवतिवेषो मोहयन्यः सुरारीन् तमहमुपस
तानां काम पूरं नतोस्मि॥४६॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे शंकरमामोहनं नाम द्वादशोध्यायः॥१२॥ श्रीशुक उवा या २
च॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु॥१॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च
नरिष्यं [illegible]तोथ नाभागः सप्तमो दिष्ट उच्यते॥२॥ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः॥ मनोर्वैवस्वतस्यैते दशपुत्राः परंतप॥ ५४
३॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः। अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः॥४॥ कश्यपोत्रिर्वसिष्ठश्च विश्वामि
त्रोथ गौतमः। जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः॥५॥ अत्रापि भगवज्जन्म कश्यपाददितेरभूत्॥ आदित्यानामवरजो वि
ष्णुर्वामनरूपधृक्॥६॥ संक्षेपतो मयोक्तानि सप्तमन्वंतराणि ते। भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च॥७॥ [illegible]
मनुपत्न्यौ [illegible] विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे। संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव॥ तृतीयां वडवामेके तासां
संज्ञासुतास्त्रयः। यमो यमी श्राद्धदेवः छायायाश्च सुतान्शृणु॥९॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या। शनैश्चरस्तृ
तीयोभूदश्विनौ वडवात्मजौ॥१०॥ अष्टमेंतर आयाते सावर्णिर्भविता मनुः। निर्मोक[illegible]विरजस्काद्याः सावर्णितनयान्नृप॥११॥ तत्र मं २
देवाः सुतपसो विरजा अमृतप्रभाः। तेषां विरोचनसुतो बलिरिंद्रो भविष्यति॥१२॥ दत्त्वेमां याचमानाय विष्णवे च पदत्रयं॥

[illegible]क॥१३॥ सप्तमादिमन्वंतराण्याह। मनुरित्यादिना यावदध्यायसमाप्तिः। आदित्यादयो देवास्तन्वयः भगवतो
[illegible]नां किंचित्स्थानं यस्मात् पृषध्याद्युक्तानां मध्ये अवरजन्मा यस्य सः। शक्त्या अवतारेणान्वितानि॥७॥ श्रीरा

ष्टमः पिता स्माकं भगवान्वादरायणः ॥ १५ इमे सप्तर्षयस्तत्र भविष्यंति स्व ५॥
मामते गा जमद्ग्न्ये स्वे स्वे आश्रममंडले ॥ १६ ॥ २

भा॰ स्कं॰ ८ अष्टमे तु [illegible] ति त्रिशिरा एकैव उरांतरतीयामाहा मम तु संज्ञैव वडवेति मतं तदुक्तं षष्ठे सैव भूत्वाथ वडवा नासत्यौ सुषु
२७ वे भुवि [illegible] इदेवश्चेति त्रयः सुताः सावर्णिः पुत्रः पदत्रयं याचमानाय इमां सर्वां महीं समर्प्यमं अंतरे दत्त्वाष्टमे मन्वंत

अश्वत्थाम

राद्द इंद्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥१३॥ योसौ भगवता बद्धः प्रीतेन सुतले पुनः। निवेशितो धिके स्वर्गादधुना
स्ते स्वराडिव ॥१४॥ गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा। देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः। स्थानं पुरंदरा
द्धृत्वा बलये दास्यतीश्वरः ॥१६॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः। धृतकेतुर्दीप्तिकेत्वादयस्तत्सुता नृप ॥१८॥ पा
रामरीचिगर्भाद्या देवा इंद्रोद्भुतः स्मृतः। द्युमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥१९॥ आयुष्मतोंबुधारायामृषभो भगवत्क
लाः भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेद्भुतः ॥२०॥ दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान्। तत्सुता भूरिषेण
द्या हविष्मत्प्रमुखा द्विजाः ॥२१॥ तत्रापि जन्म भविता हरेर्विश्वसृजां गृहे। अमूर्तिरिति विख्यातो येनाप्यायैवे जगत् ॥२२॥ हवि
ष्मान् सुकृतः सत्यो जयो मूर्तिस्तदा द्विजाः। सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः ॥२३॥ विष्वक्सेनो विषूच्यां तु शं
भोः सख्यं करिष्यति। जातः स्वांशेन भगवान् गृहे विश्वसृजो विभुः ॥२४॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्। अनाग
तास्तत्सुताश्च सत्यधर्मादयो दश ॥२५॥ विहंगमाः कामगमा निर्वाणरुचयः सुराः। इंद्रश्च वैधृतस्तेषामृषयश्चारुणादयः
श्चार्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः। वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥२७॥ भविता रुद्रसावर्णी राजन्द्वादशमो म
नुः। देववानुपदेवश्च देवश्रेष्ठादयः सुताः ॥२८॥ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः। ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः

रेविसोः प्रसादेन वराद्भं लब्ध्वा मिंद्रपदं हित्वेत्यर्थः रामः परशुरामः द्रोणपुत्रोश्वत्थामा इदानीं तु स्वयोगतः आसते तत्तदं ॥१९॥ २७
हविष्मत्प्रमुखास्तुत्कानामेव केषांचिन्नामान्याह हविष्मानिति विषूच्यां जातः सन् एकादश इत्यादि युद्धः तस्य मनोरंतरं साधयि

त वि

ष्यति। सत्यसहसः सूनृतायाश्च सुतः सूनुः। दिवस्पतेः इंद्रस्योपहर्त्ता संपादकः संभविष्यति॥२८॥ क्रियातंतून् कर्मसंततीः विता
यता विस्तारयिष्यति। युगसहस्रेण पर्ययः परिवर्त्तो यस्य युगसहस्रप्रमाण इत्यर्थः। अष्टमे त्रयोदशः॥ चतुर्दशी तु सर्वेषां मन्वा
दीन्
२९॥ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः। अंतरं सत्यसहसः सूनृतायाः सुतो विभुः॥३०॥ मनोस्त्रयोदशो भाव्यो देव
सावर्णिरात्मवान्॥ चित्रसेनविचित्राद्या देवसावर्णिदेहजाः॥३१॥ देवाः सुकर्मसुत्रामसंज्ञा इंद्रो दिवस्पतिः। निर्मोकतत्त्वद
र्शाद्या भविष्यंत्यृषयस्तदा॥३२॥ देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां संभविष्यति॥३३॥ मनुर्वा इंद्र
सावर्णिः चतुर्दशमएष्यति। उरुगंभीरबुध्याद्या इंद्रसावर्णिवीर्यजाः॥३४॥ पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति। अग्नि
र्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः॥३५॥ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः। वितानायां महाराज क्रियातंतून्
वितायिता॥३६॥ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते। प्रोक्तान्येभिर्यतः कल्पो युगसाहस्रपर्ययः॥३७॥ इति श्रीभाग
वते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने त्रयोदशोध्यायः॥१३॥ राजोवाच। मन्वंतरेषु भगवन् यथा मन्वादयस्त्विमे
। यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे॥१॥ ऋषिरुवाच। मनवो मनुपुत्राश्च मुनयश्च महीपते। इंद्राः सुरगणाश्चैव सर्वे
पुरुषशासनाः॥२॥ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप। मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः॥३॥ चतुर्युगांते का
लेन ग्रस्तान् श्रुतिगणान्यथा। तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः॥४॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः॥ युक्ताः संचार
यंत्यद्धा स्वे स्वे काले महीं नृपाः॥५॥ पालयंति प्रजापाला यावदंतं विभागशः। यज्ञभागभुजो देवा ये च तत्रान्वुकीर्तिताः॥६
व२ पत्रपन्२
[illegible] कर्माणि वर्ण्यते भगवद्वशवर्त्तिनां॥२॥ पुरुषेण ईश्वरेण यज्ञावतारैः शास्यंते नियुज्यंत इति तथा। तदेवाह। यज्ञा
[illegible] र्णणाह। चतुर्युगांत इति त्रिभिः यतः येभ्यः श्रुतिगणेभ्यः उदिताः उक्ताः युक्ताः संयताः। संतो महीं धर्मं संचारयंति।

[illegible]र्थः ॥ प्रजापालाः मनुपुत्राः तं धर्मं पालयंति यावदंतं यावन्मन्वंतरावसानं विभागशः पुत्रपौत्रादिक्रमेण
[illegible] आदयो यत्र कर्मणि भोक्तृत्वेन माहितास्ते अश्नत ॥७॥ प्रसंगाद्भूयोंतरैरपि जगद्यात्राप्रवर्तनमाह । ज्ञानमिति
[illegible] सिद्धाः सनकादयः ऋषयो याज्ञवल्क्यादयः योगेशा दत्तात्रेयादयः तद्रूपः सन् ज्ञानं कर्म च योगं वक्ति । प्रजेशा मरीच्यादयः

इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां । भुंजानः पाति लोकांस्त्रीन् कामं लोके प्रवर्षति ॥७॥ ज्ञानं चानुयुगं ब्रूते हरिः सिद्ध
स्वरूपधृक् । ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ॥८॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः । कालरूपेण सर्वेषा
मभावाय पृथग्गुणः ॥९॥ स्तूयमानो जनैरेभिर्मायया नामरूपया । विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ॥१०॥ एतत्क
ल्पविकल्पस्य प्रमाणं परिकीर्तितं । यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः ॥११॥ इति श्रीभागवते महापुराणे अष्टमस्कं
धे मन्वंतरानुवर्णनं नाम चतुर्दशोध्यायः ॥१४॥ ॥ राजोवाच ॥ बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत । भूतेश्वरः कृपणव
ल्लब्धार्थोपि बबंध तं ॥१॥ एतद्वेदितुमिच्छामि महत्कौतूहलं हि नः । यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः ॥२॥ श्रीशुक उ
वाच । पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन्भृगुभिः स जीवितः । सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्मार्थनिवेदनेन ३

तद्रूपेण सर्गं करोतीतिशेषः स्वराड्वपुः राजमूर्तिः सर्वेषामभावाय भवति पृथग्विधा गुणाः शीतोष्णादयो यस्य नामरूपात्मि
कया मायया मोहितात्मभिरेतैर्जनैः नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोपि नैव दृश्यत इत्यर्थः प्रासंगिकं निरूप्य प्रस्तुत
मेवोपसंहरति । एतत्कल्पविकल्पस्य अवांतरकल्पस्य । अष्टमे चतुर्दशोध्यायः ॥ बलिं पंचदशे विश्वजिता [illegible]या जयूता त
तो सौ स्वर्गमजयद्यो देवा निलिल्यिरे ॥१॥ अत्रेर्यत्नेन बाध्यायां वामनचेष्टितं । निग्रहश्छलतो यत्र बलेर्भूयाननुग्रहः ईश्वरः
स्वयं कृपणवत्कस्माद्धेतोरयाचत लब्धार्थोपि भूत्वापि तं कस्माद्बबंध ॥१॥ । तत्र तावद्बलेः त्रिलोकीमपहर्तुं याच्यादिबलं

२८

नुवानितिवक्तुं ब्राह्मणाराधनवलेरकां उ एवस्वर्गविजयक्रममाह। परिजितश्रीरित्यादिनायावदध्यायसमाप्तिः युद्धेपरा
जिताश्री येनरंडे णत्रस्तुभिस्त्वत्याजितः सन्। भगोवर्धपांद्यक्रादीनां महात्मा उदारचित्तः अर्थानांमिवेदनेनामर्षणेनत्रिना
कं स्वर्गं जेतुमिच्छंतं। विश्वजितायागेनयाजयन्। महाभिषेकेणैंद्रेणवह्वृचब्राह्मणप्रसिद्धेनहयश्वसिंहस्य येतुरगा
णामिवहरतोवर्णायेषां पुरटंस्वर्णं तद्वर्णोरथो धीरिक्तो यशोपितामहः प्रह्लादः जलजं शंखं विशेषैरर्जितः संपादि

तं ब्राह्मणाभृगवः प्रीयमाणाः याजयन् विश्वजिता त्रिनाकं। जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः
॥४॥ ततोरथः कांचनपट्टनद्धोह्याश्च हर्यश्वतुरंगवर्णाः। ध्वजश्च सिंहेन विराजमानोहुताशनादाससहविर्भिरिष्टात्॥५॥
धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यं। पितामहस्तस्य ददौ च माला मम्लानपुष्पां जलजं च शुक्र॥६॥
एवं सविप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोथविप्रान्। प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामंत्र्य नमश्चकार॥७॥
अथारुह्यरथं दिव्यं भृगुदत्तं महारथः। सुसन्नद्धरथो धन्वी खड्गी धृतेषुधिः॥८॥ हेमांगदलसद्बाहुः स्फुरन्मकरकुं ८
डलः। रराजरथमारूढोधिष्ण्यस्थ इवहव्यवाट्॥९॥ तुल्यैश्वर्यवलश्रीभिः स्वयूथैर्दैत्ययूथपैः। पिवद्भिरिवखं दृग्भिर्दह
द्भिः परिधीनिव॥१०॥ वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः। ययाविंद्रपुरींसमृद्धांकंपयन्निवरोदसी॥११॥ ७

तोयोध्मनार्थेर्युद्धपरिकरो यस्य। तैरेवकल्पितं स्वस्त्ययनं मंगलवाचनादियस्य। आमंत्र्यपृष्ट्वा। अथारुह्यरराजेतिद्वयोरन्व
हस्याः ... माभलसद्बाहुरः। हेमांगदाभ्यां लसंतो वाहू यस्य धिष्ण्यः वनेप्रज्वलितकुंडस्थआहवनीयइवेतिवा॥९॥ तु
ल्यैश्वर्यवलश्री ... दैत्ययूथपैर्वृतो ययाविति द्वयोरन्वयः परिधीन्दिशः आह्लोच्यतिसमृद्धां विकयामसुखं॥१०॥ त
थाविधां पुरी ... सेंद्रादयः अलापतइति वेयगपार्थमिंद्रपुरीमनुवर्णयति। रम्यामिति रेकादशभिः उपवनानि

५

नी॰ ...नानि निकु[illegible] ...प्रधानानि इहस्थानि निवातैः रम्याः कूजंति विहंगमिथुनानि येषु । गायंतो मत्ता मधुव्र
[illegible] ...नां[illegible] ...भारो यासु ताः शाखा येषां ते भ्रमरद्रुमा येषु तैः यत्र यासु सुरसेविताः प्रमदाः क्रीडंति ताः हंसादिकुलैः
२९ [illegible] ...लिन्यः सरांसि यत्र येषु । मत्तैः तैः उपवनोद्यानैः रम्यामिति पूर्वेणान्वयः किंच परिखाभूतया आकाशगंगया हृता
[illegible] ...कारेण सौवर्णेन चाप्लुतां अट्टालकाः प्राकारोपरि वितानस्थुन्नतानि पुरस्थानानि । तत्र हि तेन तत्कापदानि कपाटानि येषु तेर्द्वा

रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः । कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ २३ ॥ प्रवालफलपुष्पोरुभारशाखाम
रद्रुमैः ॥ हंससारसचक्राह्वकारंडवकुलाकुलाः ॥ २४ ॥ नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः । आकाशगंगया देव्या हृतां
परिखिभूतया ॥ २५ ॥ प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च । रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ॥ २६ ॥ जुष्टां विभ
क्तप्रपथां विश्वकर्मा विनिर्मितां । सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युतां ॥ श्रृंगाटके मणिमये वज्रविद्रुमवेदिभिः ॥ २७ ॥
यत्र नित्यवयोरूपाः श्यामा विरजवाससः । भ्राजंते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ॥ २८ ॥ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्र
जां । यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥ २९ ॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना । पांडुरेण प्रतिच्छिन्नमार्गे यांति भि३
सुरस्त्रियः ॥ ३० ॥ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृतां । शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकल
दे२
रैरेवांतरैः स्फटिकमयैर्गोपुरैश्च पुरद्वारैः जुष्टां विभक्ताः प्रपथा राजमार्गा यस्याः सभाउपवेशस्थानानि चत्वरांगनानि रथ्या उप
मार्गाः तैः आढ्यां संपन्नां । न्यर्बुदं दशकोटयः तैर्गणनीयैः अनंतैर्विमानैर्युतां । वज्रविद्रुममया वेदयो येषु तैः श्रृंगाटकैश्चतुःपथैः २९
युतां ॥ २७ ॥ नित्यं वयस्तारुण्यं रूपं च सौकुमार्यं यासां ताः रूपवन्नैर्यैः स्वलंकृताः स्त्रियः यत्र यस्यां । भ्राजंते सुरस्त्रीणां केशभ्योवि
भ्रष्टानां वासो गंधकस्रजामामोदं गृहबाह्येभ्यो निर्गच्छतीह मेन सुरस्त्रियो अप्सरसः मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च

ध्वजैः नानापताकाभिर्मुक्ताभिर्वलभीभिश्च विमानानां पुरोभागैः आहृतां व्यजनां वैमानिकस्त्रीणां कलगीतैर्मंगलां।उपदे
वानां गंधर्वादीनां गीतकैश्च मनोरमां। जितप्रभा सा च्छादीत् अधिष्ठात्री देवता यया सा। अन्यैरजितप्रभामिति। वा। पाठांतरे जि
ताग्रहाः सूर्यादयो यया। यतत्यां कृतन्यया सेनया।२५। केन हेतुना एवं तेजसा ऊर्जितं आसीत्। प्रतिवोढुं अपाकर्तुं यतः का

मृदंगशंखानकदुंदुभिःस्वनैः सतालवीणामुरजेष्टिवेणुभिः। नृत्यैः सवाद्यैरुपदेवगानकैर्मनोरमां स्वप्रभया जि
तग्रहां।२१। यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः। मानिनो लुब्धा एभिर्हीना व्रजंति यां।२२। तां देवधानीं स वरूथि नःकामिर
नीपतिर्बहिः समंतात् रुरुधे पृतन्यया। आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन्भयमिंद्रयोषितां।२४। मघवांस्त
दभिप्रेत्य बलेः परममुद्यमं। सर्वदेवगणोपेतो गुरुमेतदुवाच ह।२५। भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः। अविष
ह्यमिमं मन्ये केनासीत्तेजसोर्जितः।२६। नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः। पिबन्निव मुखेनेदं लिहन्निव दि
शो दिशः।२७। दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः। ब्रूहि कारणमेतस्य दुर्द्धर्षत्वस्य मद्रिपोः।२८। ओजः सहो बलं
तेजो यत एतत्समुद्यमः।२९। गुरुरुवाच। जानामि मघवञ्छत्रोरुन्नतेरस्य कारणं। शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्म
वादिभिः।३०। भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिं। नास्य शक्तः पुरः स्थातुं कृतांतस्य यथा जनाः।३१। तस्मान्निलय
मुत्सृज्य यूयं सर्वे त्रिविष्टपं। यात कालं प्रतीक्षंतो यतः शत्रोर्विपर्ययः।३२। एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः।
...पमानेन सानुबंधो विनंक्ष्यति।३३। एवं सुमंत्रितार्थास्ते गुरुणार्थानुदर्शिना। हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः।३४।
...बलिर्वैरोचनः पुरीं। देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयं।३५। तं विश्वजयिनं शिष्यं भृगवः शिष्य
...तस्य समुद्यमः उपभृतं संचितं ततो चिंतं मंत्रमाह। तस्मान्निलयं त्रिविष्टपमुत्सृज्य निलयनं दर्शनं
...रित्यनुग्राह।३४। एष इति। विप्राणां बलेन उदर्कः उत्तरोत्तरमधिकं फलं यस्य सः सुमंत्रिताः

भा० अ० अर्थः ...मुः एवं प्रातामिद पदं। स्थितो कर्तुमयाजयन्। अनुव्रतं अनुव्रर्हिनं द्विजदेवे ब्राह्मणे रूपलंभितां
... शोनशोचयंत्यादितेः पतिः प्रार्थितः कश्यपः प्राहपयोव्रतमितीर्यते॥१॥ इदानीं श्री वामनाव
३० ...ताः इयवस्तमात्रिः नष्टेषु अष्टेषु सत्सु। सः कश्यपः पत्नीमिदमाह। दीनवदनात्व दिकमालक्ष्य वडुधा विक
...तेनहयमेधानामनुव्रतमयाजयन्। ३६। ततस्तदनुभावेन भुवनत्रयविश्रुतां। कीर्तिं दिक्षु वितन्वानः स्मरो
जेतडुराडिव। ३४। भुंजेचश्रियंस्वृद्धां द्विजदेवोपलंभितां। कृतकृत्यमिवात्मानं मन्यमानो महामनाः॥३५॥ इति श्री भागव
ते महापुराणे अष्टमस्कंधे पंचदशोध्यायः॥१५॥ श्रीशुक उवाच॥ ।एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा। हृते त्रिविष्टपे दै
त्यैः पर्यतप्यदनाथवत्॥१॥ एकदा कश्यपस्तस्या आश्रमं भगवानगात्। निरुत्सवं निरानंदं समाधेर्विरतश्चिरात्॥२॥ स पत्नीं
दीनवदनां कृतासनपरिग्रहः। सभाजितो यथान्यायमिदमाह कुरूद्वह॥३॥ अप्यभद्रं न विप्राणां भद्रे लोकेधुनागतं। न ध
र्मस्य न लोकस्य मृत्योः छंदानुवर्तिनः॥४॥ अपि वाकुशलं किंचित् गृहेषु गृहमेधिनि। धर्मस्यार्थस्य कामस्य यत्र योगो ह्य
योगिनां॥५॥ अपि वातिथयो भ्येत्य कुटुंबासक्तया त्वया। गृहादपूजिता जाताः प्रत्युत्थानेन वा क्वचित्॥६॥ गृहेषु
येषु तिथयो नार्चिताः सलिलैरपि। यदि निर्यांति ते नूनं फेरुराजगृहोपमाः॥७॥ अप्यग्नयस्तु वेलायां न हुता हविषा
सति। त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित्॥८॥ यत्पूजया कामदुघान् याति लोकान् गृहान्वितः। ब्राह्मणोग्निश्च वै
विष्णोः सर्वदेवात्मनो मुखं॥९॥ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि। लक्षयेस्वस्थमात्मानं भवत्या लक्षणैरहं॥१०

ल्पयन् प्रच्छति। अप्यभद्रमितित्रिभिः हे भद्रे। मृत्योश्छंदमिच्छां मनुवर्तत इति तथा। मृत्युवशवर्तिनो जनस्येत्यर्थः हे गृहमेधिनि ३०
अपि वा विंवा। गृहेषु धर्मादेः किं विस्कुलमिति कश्चात्प्रश्नः यत्र येषु अयोगिनामपि योगः स्वधर्मादिना योगफलं भवति। किं च त्वया
पूजिता। एवाभ्येत्य गृहाद्याता नार्चिताः संतो यदि निर्गच्छंति ते गृहाः फेरुराजः सृगालराजः तदीयश्वभ्रतुल्याः वेलायां होमकाले कर्हि

आस्वास्य कारणमन्यदस्तीति वक्तुं तत्र प्रष्टमभद्रादिकं नास्तीत्याह। भद्रमिति द्वाभ्यां। इमे गृहाः त्रिवर्गस्य परं क्षेत्रं उद्भव
स्थानं त्रिवर्गोपि यथावद्वर्त्तत इत्यर्थः भगवतस्तवानुध्यानेन यस्माद्यातयेत तस्मात् अग्नयो तिथय इत्यादि सर्वं न रिष्यति
न हीयते। प्रस्तुतं विज्ञापयितुमाह। को न्विति संपद्येत काममाह। तवैवेति चतुर्भिः सपत्नैः हृता श्रीर्येषां हृतस्थानं येषामिति

अदितिरुवाच। भद्रं द्विजगवां ब्रह्मन् धर्मस्यास्य जनस्य च। त्रिवर्गस्य परं क्षेत्रं गृहमेधिन् गृहा इमे॥१०॥ अग्नयो तिथयो
भृत्या भिक्षवो ये च लिप्सवः। सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति॥१२॥ को नु मे भगवन्कामो न संपद्येत मानसः।
यस्या भवान्प्रजाध्यक्षः एवं धर्मान्प्रभाषते॥१३॥ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः। समो भवां
५४ स्तांस्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः॥१४॥ तस्मादीश भजंत्या मे श्रेयश्चिंतय सुव्रत। हृतश्रियो हृतस्थाना
न्सपत्नैः पाहि नः प्रभो॥१५॥ परैर्विवासिता साहं मग्ना व्यसनसागरे। ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम॥१६॥ यथा
तानि पुनः साधो प्रपद्येरन्ममात्मजाः। तथा विधेहि कल्याणं धिया कल्याणकृत्तम॥१७॥ श्रीशुक उवाच। एवमभ्यर्थितोदि
त्या कस्तामाह स्मयन्निव। अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत्॥१८॥ क्व देहो भौतिको नात्मा क्व चात्मा प्रकृतेः परः।
कस्य के पति [illegible] मोह एव हि कारणं॥१९॥ उपतिष्ठस्व पुरुषं भगवंतं जनार्द्दनं। सर्वभूतगुहावासं वासुदेवं
जगद्गुरुं॥२०॥ स विधास्यति ते कामान्हरिर्दीनानुकंपनः। अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम॥२१॥

[illegible] कश्यपः अथ मंतावत्सुतत्वे हंत्याजयितुं विस्मिय व्याजेन तत्वमुपदिशति। अहो इति सार्द्धेन। अत्र परि
[illegible] भ्यां न त्वेवं हृतकामप्राप्तिहेतुर्देवतांतरमेव। इति सिद्धांतयन्नाह। अमोघेति॥२१॥ ॥यथा वै मे म
नोरथं सि[illegible] मन्वनुध्यातितथा तत्से वा प्रकारमादिश मे मया इष्टः प्रजनो यद्भूतमाह एतमेव वक्ष्यामीत्यन्वयः॥

२

ना० म्रू० २१

आमलकद्वादशीविधिः इत्यमाह। सिनीवाल्यामित्यादिना। व्रह्मवीर्येयातज्ञास्यामित्यनेनग्रंथेन यदिलभ्यते तर्हिक्रो
डविदं कीर्त्तिसंपाद्यालिप्यतत्रमंत्रः त्वंदेवीति। देहेवित्वंरसायाः उद्धृतासिनिवर्त्तितआत्मनियमोनित्यनैमित्ति
कोयेन। तत्रावाहनादोनवमंत्रानाह। नमस्तेम्भमित्यादौविशेषतस्तद्वादशाक्षरंवक्ष्यति। चतुर्विंशतिगुणास्त्वानितानि

चेदिति हवाच। केनाहंविधिनाव्रह्मन्उपस्थास्येजगत्पतिं॥ यथामेसत्यसंकल्पोविदधातिमनोरथं॥२२॥ आदिश
त्वंद्विजश्रेष्ठविधिंतदुपधावनं। आशुतुष्यतिमेदेवः सदंताः महगुत्तकैः॥२३॥ कश्यपउवाच॥ एतन्मेभगवन्पृष्टःप्रजा
कामस्यपद्मजः। यदाहतेप्रवक्ष्यामिव्रतंकेशवतोषणं॥२४॥ फाल्गुनस्यामलेपक्षेद्वादशाहंपयोव्रतः। अर्चयेदर
विंदाक्षंभक्त्यापरमयान्वितः॥२५॥ सिनीवाल्यांमृदालिप्यस्नायात्क्रोडविदीर्णया। यदिलभ्येतवैस्रोतस्येतंमंत्रमु
दीरयेत्॥२६॥ त्वंदेव्यादिवराहेणरसायाःस्थानमिच्छता। उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रनाशय॥२७॥ निर्वर्त्तितात्म
नियमोदेवमर्चेत्समाहितः। अर्चायांस्थंडिलेसूर्येजलेवह्नौगुरावपि॥२८॥ नमस्तुभ्यंभगवतेपुरुषायमहीयसे। सर्व
भूतनिवासायवासुदेवायसाक्षिणे॥२९॥ नमोव्यक्तायसूक्ष्मायप्रधानपुरुषायच। चतुर्विंशद्गुणज्ञायगुणसंख्या
नहेतवे॥३०॥ नमोद्विशीर्ष्णेत्रिपदेचतुःशृंगायतंतवे। सप्तहस्तायय़ज्ञायत्रयीविद्यात्मनेनमः॥३१॥ नमःशिवायरुद्रायनमःश
क्तिधरायच॥ सर्वविद्याधिपतयेभूतायपतयेनमः॥३२॥ नमोहिरण्यगर्भायप्राणायजगदात्मने॥ योगैश्वर्यशरी

तानिजानातीतितथातस्मैगुणसंख्यानस्यहेतवेसांख्यप्रवर्तकाय॥३०॥ एवंसामान्यतोनत्वागुणावतारात्प्रणमतित्रिभिः
मंत्रादौमंत्रोक्तयज्ञरूपेणविष्णोःप्रणामोनमस्तेति। द्वेशीर्षेयस्य। त्रयःपादायस्यतंतवेफलविस्तारकाय। त्रय्याविद्यामात्मायस्य
तित्रिधावद्धःभृत्यस्यार्थेउक्तः तथाचमंत्रः चत्वारिशृंगात्रयोस्यपादाद्वेशीर्षेसप्तहस्तासोऽस्यत्रिधावद्धोवृषभोरोरवीति। महो

२१ फाल्गुनामलकीव्रतं श्लोक २

देवे मत्यांणा विवेशेति उक्तः तथा च मंत्रं चत्वा मार्ग मुक्तवदाप्नुतः सोयं प्राज्ञैर्यथा यथं ॥ विश्वात्मा यज्ञरूपेण स्तूयते नेन तत्त्वतः
तथा च याज्ञवल्क्यः। चत्वारि शृंगेति वेदा एवोक्ताः। त्रयो अस्य पादा इति सवनानि त्रीणि। द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्ताः
सप्त छंदांसि। त्रिधा बद्धो मंत्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवणं सवनक्रमेण ऋषिप्रभृतिभिः समभिर्यदेनमृग्भिः संततियु

नमस्ते आदिदेवाय साक्षिभूताय ते नमः ॥ नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥ नमो मरकतश्यामवपुषेधिगतश्रि
ये। केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ। अतस्ते श्रेयसे धीराः पादरेणुमुपा
सते ॥ ३६ ॥ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः ॥ स्पृहयंत इवामोदं भगवान्मे प्रसीदतां ॥ ३७ ॥ एतैर्मंत्रैः हृषी
केशमावाहनपुरस्कृतं। अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वा गंधमाल्याद्यैः पयसा स्नापयेद्वि पायस
भुं। वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः। गंधधूपादिभिश्चार्चेत् द्वादशाक्षरविद्यया ॥ ३९ ॥ शृतं पयसि नैवेद्यं
शाल्यन्नं विभवे सति। ससर्पिः सगुडं दत्वा जुहुयात् मूलविद्यया ॥ ४० ॥ निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयं दत्वाच समुच्चये वा शब्दः
मनमर्चित्वा तांबूलं च निवेदयेत् ॥ ४१ ॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुं। कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दंडवन्मु
दा ॥ ४२ ॥ कृत्वा शिरसि तच्छेषां देवमुद्वासयेत्ततः ॥ द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं ॥ ४३ ॥ भुंजीत तैरनु
ज्ञातः शेषं सेष्टः सभाजितैः ॥ ब्रह्मचर्यमथ तद्रात्र्यां श्वोभूते प्रथमेहनि ॥ ४४ ॥ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः
पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनं ॥ ४५ ॥ पयोभक्षो व्रतमिदं चरेद्विष्णुर्चनादृतः। पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ६४

...ते ज्ञातिला...भक्तवति। प्राणाय सर्वात्मने। यो गैर्ध्ये शरीरस्य अधिगता ज्ञानिनो ग्रीवं तस्मै तत्पादपद्मयोरामोदं स्पृहयंत इव दे
...नितरां मे प्रसीदतु आवाहनेन पुरस्कृतं समानितं ॥ ३९ ॥ पयसि शृतं पक्वं पायसं। मूलविद्याया द्वादशाक्षरेणैव पूर्वोक्ता

ना०ग्रं० [illegible]तिः जमेशेषं निर्माल्यं हरोश्च वरेयेषां तान्। असंभवे द्वावपि भोजयेदितरार्थः सभाजिते तैरनुज्ञातः सन्शेषं वं

१२ [illegible]हितः तस्यां रात्रौ ब्रह्मचारी सन्भ्योऽपि ते प्रभाते सति पयएव न ह्येव आहारो यस्य। अधःस्वप्नं शयनं। पंचकैः पंचामृतैः।।४४

एवं वै हरेर्हः कुर्याद्द्वादशाहं पयोव्रतं। हरेराराधनं होमं महर्णं द्विजतर्पणं।।४७।। प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोद
शी।। ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवनं चरेत्।।४८।। वर्जयेदसदालापभोगानुच्चावचांस्तथा। अहिंस्रः सर्वभूतानां वा
सुदेवपरायणः।।४९।। त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः। कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः।।५०
पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः। चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे।।५१।। हृतेन तेन पुरुषं यजेत सुस सूत्रको०७८
माहितः। नैवेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदं।।५२।। आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः। तोषयेदृत्विजश्चैव तद्वि
द्याराधनं हरेः।।५३।। भोजयेत्तान्गुणवतान्नेन शुचिस्मिते। अन्यांश्च ब्राह्मणान्शक्त्या ये च तत्र समागताः।।५४।।
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः। अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान्।।५५।। भुक्तवत्सु च सर्वेषु दीनांध
कृपणेषु च। विष्णोस्तत्प्रीणनं विद्वान्भुंजीत सह बंधुभिः।।५६।। नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः। कारयेत्तत्क
थाभिश्च पूजां भगवतोऽन्वहं।।५७।। एतत्पयोव्रतं नाम पुरुषाराधनं परं। पितामहेनाभिहितं मया ते समुदाहृतं।।५८।।
त्वं चानेन महाभागे सम्यक्चीर्णेन केशवं। आत्मना शुद्धभावेन नियतात्मा भजाव्ययं।।५९।। अयं वै सर्वयज्ञाख्यः सर्व
व्रतमिदं स्मृतं। तपःसारमिदं भद्रे दानं चेश्वरतर्पणं।।६०।। त एव नियमाः साक्षात्त एव च यमोत्तमाः। तपो दानं व्रतं यज्ञो राम
येन तुष्यत्यधोक्षजः।।६१।। तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धयाचर। भगवान्परितुष्टस्ते वरानाशु विधास्यति।।६२।। इति श्री १२
मयावते समुदाहृतं सर्वयज्ञाख्यो यं यज्ञः सर्वव्रतमिति च स्मृतमेतद्व्रतं।। ।।इत्यष्टमे षोडशः।।। श्रीरामाय नमः

ततः सप्तदशे दित्या हृते वस्मिन् व्रते हरिः । तत्कामपूरणायादौ तत्सुतोभूदिति ईयते ॥२॥ प्रीतिविक्लवा देवमाबद्धांजलिः
सती स्थिता केवलं ईडितुं पुन नोत्सिहे न शशाक यथापि तत्स्तुतीं वक्तुं कथं भूता आनंदजलेनाकुले ईक्षणे यस्याः पुलकैरा

भागवते महापुराणे अष्टमस्कंधे कश्यपादितिसंवादो नाम षोडशोध्यायः ॥१६॥ श्रीशुक उवाच । इत्युक्ता सादिती राज
न्स्वभर्त्रा कश्यपेन वै । अन्वतिष्ठद्व्रतमिदं द्वादशाहमतंद्रिता ॥१॥ चिंतयंत्येकया बुध्या महापुरुषमीश्वरं । प्रगृह्येंद्रि
यदुष्टाश्वान्मनसा बुद्धिसारथिः ॥२॥ मनश्चैकाग्रया बुध्या भगवत्यखिलात्मनि । वासुदेवे समाधाय चचार ह पयो
व्रतं ॥३॥ तस्याः प्रादुरभूत्तात भगवानादिपुरुषः । पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ॥४॥ तं नेत्रगोचरं वीक्ष्य
सहसोत्थाय सादरं । ननाम भुवि कायेन दंडवत्प्रीतिविक्लवा ॥५॥ सोत्थाय बद्धांजलिरीडितुं स्थिता नोत्सेह
आनंदजलाकुलेक्षणा । बभूव तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥६॥ प्रीत्या [illegible] शनैर्गद्ग
दया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह । उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिं ॥७॥
अदितिरुवाच । यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय । आपन्नलोकवृजिनोपशमोदया
द्य शं नः कृधीश भगवन्नसि दीननाथः ॥८॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ।
स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥९॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मी

[illegible]तो आकांतो हृदो यस्याः तस्य दर्शनेन य उत्सवः तेन गात्रे वेपथुः कंपो यस्याः सा ॥६॥ । तुष्टाव पिबतीवोद्वीक्षमाणेति
[illegible]रूपा भगवान्नाभिः । मर्त्यस्य यदस्य द्विस्त्रिः किरदोषः अय नतो निर्जित्य दैत्यानामत्र निर्जितानपि भक्तान्नक्षितुमीशास्तमित्य
सौ दितः [illegible]भिः यज्ञेशेत्यादिहाशभिः संबोधनैस्तवाशक्यं किमपि नास्तीति वदंती प्रार्थयते । शं नः सुखं कुरु । यतो दीनानां

भा० अ०
७२

यो[illegible]र्थं श्रव कीर्ति यस्य श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य। आपन्नानां शरणं गतानां लोकानां। वृजिनोपशमा
य[illegible]दयाय स। [illegible]महते नमः महत्त्वे हेतवो विश्वाय विश्वस्य भवनस्थितिसंयमार्थं स्वैरं गृहीताः पुरुशक्तेर्माया या गुणा
[illegible]स्मै तथापि स्वस्थाय अच्युतस्वरूपाय कुतः शश्वदुपबृंहितः नित्यो जितो यः पूर्णो बोधस्तेन व्यापादितं नित्यनिरस्तं
[illegible]त्मनि तमो मायालक्षणं येन तस्मै। अस्मदीयमनोरथपूर्णमीषत्करमेवेति कैमुतिकन्यायेनाह। आयुः परं [illegible]

द्यौभूरसाः सकलयोगगुणास्त्रिवर्गः ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः
१०। श्रीशुक उवाच। अदित्यैवं स्तुतो राजन्भगवान्पुष्करेक्षणः। क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत॥११॥
श्रीभगवानुवाच। देवमातर्भवत्या मे विज्ञातं चिरकांक्षितं। यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः॥१२॥ तान्विनिर्जित्य
समरे दुर्मदानसुरर्षभान्। प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं॥१३॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां॥
स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः॥१४॥ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः। नाकपृष्टमधिष्ठाय
क्रीडतो द्रष्टुमिच्छसि॥१५॥ प्रायोधुना तेसुरयूथनाथा अपारणीया इति देवि मे मतिः। यत्तेनुकूलेश्वरविप्रगुप्ता न वि
क्रमस्तत्र सुखं ददाति॥१६॥ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते। ममार्चनं नार्हति गंतुमन्य

अनतिक्रमनीय

पुनरपि यो श्वभ्र रसातलं च द्यौ भूरसाः द्यौरिति पृथक्पादे भूश्च रसा च दिव स्वर्ग इति विग्रहः हसेति पादे त्रीणि पदानि सक
ला योगगुणा गुणिमादयः क्षेत्रज्ञस्त्वान्तर्यामी॥११॥ सपत्नैर्हृतश्रीर्येषां। स्वधामतः च्यावितानां च पुत्राणां संबंधि यत्। तद्भव
त्या चिरमाकांक्षितं मया विज्ञातं। कांक्षितमेवाह। तानिति त्रिभिः। प्रतिलब्धा जयश्रीश्च यैस्तैः पुत्रैः। सह उपासितुं एकत्र स्था
तुमिच्छसि। प्रत्याहृतं जयश्च श्रीश्च यैस्तान्। अपारणीयाः अनतिक्रमनीयाः यस्मात् अनुकूल ईश्वरः कालो येषां ते विप्रैः गुप्ता

राम
कृष्ण

स्त्रीव्रतेनार्चितः तस्मै वानुगुणान्नरूपं यथास्यात् तथा समीडितः तस्थ्याहमितपञ्चप १

रक्षिताः अनुकूलैरीश्वरैः समर्थैर्विप्रैः गुप्ता इति वा । न मम मया चिंत्य एव तत्र हेतुः संगोपितस्येत्यादि । श्रद्धानुरूपं इच्छानुसारेण
फलहेतुत्वात् । मारीचं सतपसि त्वधिष्ठाय स्थितः सन् गोप्तास्मि पालयिष्यामि । अतः पतिमुपाधाव भजस्व । देवानां गुह्यं रहस्यं
सर्वं सुसंवृतं तु संगुप्तं सन् संपद्यते सिध्यति ॥२०॥ प्रभोः हरेरात्मनि जन्म लब्ध्वा । अवितथमीक्षणं दृष्टिर्यस्य सः अतिलोयथा

त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधि-
ष्ठितः ॥१८॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषं । मां च भावयती पत्यावेवं रूपमवस्थितं ॥१९॥ नैतत्परस्मा आख्येय
पृष्टयापि कथंचन सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं ॥२०॥ श्रीशुक उवाच । एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत ॥ अ-
प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः । सोदित्यां वीर्यमाधत्त तपसा चिरसंभृतं समाहितमना राजन् दारुण्यग्निं यथा-
निलः ॥२३॥ अदितेर्धिष्ठितं गर्भं भगवंतं सनातनं । हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥२४॥ ब्रह्मोवाच । जयोरु-
गाय भगवन्नुरुक्रम नमोस्तु ते । नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः ॥२५॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे
। त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥२६॥ त्वमादिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः । कालो भवाना-
क्षिपतीश विश्वं स्रोतो यथांतःपतितं गभीरं ॥२७॥ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः ॥
६ ?? अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ॥२१॥ उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् । स वै समाधियोगेन कश्यपस्तदबुध्यत ॥२२

मनस्त वर

[illegible]मोपि दारुनिसंघर्षेण वह्निः सहक्रमग्निमाधत्ते एवं स्वयं पुत्रेषु समोपि दैत्यपक्षपातं वीर्यमाधत्तेत्यर्थः । धिष्ठितं अधिष्ठाय स्थि-
तं । [illegible] त्वेत्यर्थः । अदितेरेव पूर्वस्मिन्जन्मनि पृश्निरिति नाम तस्मा अर्भकाय वेदा गर्भे यस्य । यद्वा वेदानां गर्भाय वेदेषु प्र-
काशमा[illegible]नेत्यर्थः । त्रयो लोका नाभौ यस्य सः त्रिनाभो तस्मै त्रयाणां लोकानां उपरि पृष्ठे स्थिताय । शिपिशब्देन पशवो जीवास्तेषु

न० अ० तर्यामितया प्रविष्टस्य। यज्ञो वै विष्णुः पशवः शिपिः यज्ञ एव पशुषु प्रतिष्ठति। निरुक्ते। यद्वा शिपयो रश्मयस्तैर्विष्टितायेत्यर्थः। त
७४ था शिपिविष्टस्य व्यापिनो वेश्रेतः पतिनं त्वरणादिगंभीरश्रोत आशि पते आकर्षति तया कात्मा भवान् विश्वमाशिपति। संविष्णुः उत्प भ
द्यशीलेमिथ्यमेभावः नह्येवं भूतस्य तवः नह्येवं भूतस्य तव जन्मादि सम्भवः किंतु देवानां प्रजापतीनां प्रजानां परमाश्रयत्वेन (७)

दिवौकसां देव दिवच्युतानां परायणं नो शिवमज्ञतोस्तु ॥२८॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे सप्तदशो
ध्यायः ॥१७॥ श्रीशुक उवाच ॥ इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां। चतुर्भुजः शंखगदाब्जचक्रः पि
शंगवासा नलिनायतेक्षणः ॥१॥ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् ॥ श्रीवत्सवक्षा
वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः ॥२॥ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः
। प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन् कंठनिविष्टकौस्तुभः ॥३॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः।
प्रहृष्टा ऋतवो गुणान्विताः। द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥४॥ श्रीरामाय नमः देवा

ततस्तवर्ष्टदशे भूत्वा वामनः सत्कर्तो खिलैः। यज्ञं गतिस्तनतस्तेन मत्कृत्योक्तो वरान् शृणु ॥१॥ इत्थं विरिंचेन स्तुतं कर्म देवकार्य
लक्षणं वीर्यं च प्रभावो यस्य स हरिरदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः। अमृतभूः मृत्युजन्मरहितः स्वः शंखगदाब्जचक्राणि
लसंतीति तथा। अब्जं अब्देले नमत्वं धीयो प्रत्ययः अविसर्गपिस्वासो पिसंगवासा झषराजो मकरः तौ द्वाकारयोः कुंडल राम
योस्त्विषा उल्लसंती श्रीर्वदनांबुजे यस्य श्रीवत्सो वक्षसि यस्य। वलयैरंगदैश्च सहोल्लसंति किरीटादीनि यस्य। श्रीमत्या वन वृद्ध
मालया विराजितः वेश्मगतं तमः अग्निजिह्वा देवाः नगाः पर्वताः तत्प्रादुर्भावसमयमाह ॥४॥ श्रीरामो जयति ॥ ७८

श्रोणायामिति भाद्रपदस्य शुक्ला द्वादशी श्रवणद्वादशीति प्रसिद्धा। तस्यां तत्रापि श्रोणायां श्रवणस्थे चंद्र इत्यर्थः तत्रापि श्र
वणस्य प्रथमांशेऽभिजिन्नक्षत्रे। तद्वस्तुत्पादयति। अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानामधस्ताच्छ्रोणाया इति। एवंवि
शिष्टे मुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः किंच नक्षत्राणि अश्विन्यादीनि ताराशब्देन ताराः ग्रहाः गुरुशुक्रादयः ते आद्या येषां ते सूर्याद
योऽपि सर्वे तस्य जन्म दक्षिणं उदारं चक्रुः जन्ममुहूर्ते गुणवद्भिर्नो बभूवुरित्यर्थः॥५॥ विशेषांतरमाह यस्यां द्वादश्यां

भाद्रपद १ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः। सर्वे नक्षत्रताराद्याः चक्रुस्तज्जन्म दक्षिणं॥५॥ द्वादश्यां सवितातिष्ठन्
हरि २ मध्यंदिनगतो नृप। विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः॥६॥ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः। चित्रवादि
श्रा ३ त्रतूर्याणां निर्घोषस्तुमुलोऽभवत्। प्रीताश्चाप्सरसोऽनृत्यन् गंधर्वप्रवरा जगुः। तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः
॥ सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः। चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः॥ गायंतोऽतिप्रशंसंतो नृ
श्रा ३ त्यंतो विबुधानुगाः। अदित्या आश्रमपदं कुसुमैः समवाकिरन्॥१०॥ दृष्ट्वादितिस्तं निजगर्भसंभवं परं पुमांसं मुद
मापविस्मिता। गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः॥११॥ यत्तद्वपुर्भाति विभूषणायुधैरव्यक्त
चिद्व्यक्तमधारयद्धरिः। बभूव तेनैव स वामनो वटुः संपश्यतोर्दिव्यगतिर्यथा नटः॥१२॥ ॥श्रीरामाय नमः॥

हरेर्जन्म तत्। तस्यां मन्ये च विदुः। तदा च मध्यंदिनगतः सविता तिष्ठन् सा च द्वादशी विजया नाम प्रोक्ता इत्यन्वयः सद्योत्तमा
मन्ये पांच वित्रतूर्याणां निर्घोषोऽभवत्। देवा मनव इत्यादिना कुसुमैः समवाकिरन्निति तृतीयेनान्वयः विस्मयांतरमाह।
यत्तद्वपुर्हरिरधारयत् प्रकाशितवान्। तेन च वपुषा मातापित्रोः संपश्यतोः स्वे वामनो वटुर्बभूव दिव्यगतिः अद्भुतचेष्टितः स्व
यं कथंभूतः अव्यक्तः चिद्रूपः कथमधारयत् भाति। तो भाति दीप्ति विभूषणानि च आयुधानि च तैर्व्यक्तं यथा भवति

ना० क्र०

३५

तथा कर्माणि भ्रातकर्मादीनि। वनस्पतिर्वनानां पतिः सोमः पात्रिकां द्विजापात्रीं ॥१७॥ एवं संभावितो मारिषः स्वेष्टो वटुब्रह्म
वर्चसे मनब्रह्मर्षिगणसंघुष्टो नो सभामतिक्रमारोचत। यदर्थं वटुर्वभूव तदाह। श्रुत्वेत्यादि यावत्समाप्तिः। यजमानेजन्न

वटुं वामनं दृष्ट्वा मोदमाणा महर्षयः कर्माणिकारयामासुर्नमस्कृत्य प्रजापतिं ॥१३॥ तस्योपनीयमानस्य सावित्री
सविताब्रवीत्। बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥१४ ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः। कौपीनाच्छादनं
माता द्यौश्छत्रं जगतः पतेः ॥१५॥ कमण्डलुं वेदगर्भः कुशान्सप्तर्षयो ददुः। अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥१६॥

पानीका
पात्र ३४ तस्मा इत्युपनीताय यक्षराट्पात्रिकामदात्। भिक्षां भगवती साक्षादुमादाद्विका सती ॥१७॥ स ब्रह्मवर्चसेनैवं सभां संभावि
तो वटुः। ब्रह्मर्षिगणसंघुष्टामत्यरोचत मारिषः ॥१८॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनं। परिस्तीर्य समभ्यर्च्य समि
द्भिरजुहोद्द्विजः ॥१९॥ श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः। जगाम तत्राखिलसारसंभृतो भारेण गां
सन्नमयत्पदे पदे ॥२०॥ तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके। प्रवर्तयन्तो भृगवः क्रतूत्तमं व्यचक्षता
रादुदितं यथा रविं ॥२१॥ ते ऋत्विजो यजमानः सदस्या हततिविषो वामनतेजसा नृप। सूर्यः किलायात्युत वा विभावसुः स
नत्कुमारोऽथ दिदृक्षया क्रतोः ॥२२॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः। छत्रं सदण्डं सजलं कमं
डलुं विवेश बिभ्रद्धयमेधवाटं ॥२३॥ मौञ्ज्या मेखलया वीतमुपवीताजिनोत्तरं। जटिलं वामनं विप्रं मायामाणवकं हरिं ॥२४॥ प्रवि
ष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः। प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा ॥२५॥ यजमानः प्रमुदितो दर्शनी

समुपवी २

भृगुणां भृगुभिः उपाकल्पितैः येः प्रवर्तितैः अखिलेन सारेण बलेन संभृतः संपूर्णः नर्मदा उत्तरेतटे भृगुकच्छसंज्ञके क्षेत्रे क्रतू ३५
मं प्रवर्तयन्तो ये बलेः ऋत्विजो भृगवः तेतत्र वटुं तत्र अपश्यन्। आरात्समीपएवोदितं रविमिव। तत्र ऋत्विगादयः सूर्यः किलेत्येवमादी

न्यतकयंतीतिशेषः।हयमेधवाटंअश्वमेधमंडपंविवेश।उपवीताजिनेउपवीतञ्चअजिनंमेखलञ्चउत्तरमुत्तरीयंयस्यतं।सोऽग्नाः श्री
अभिभूताःसंतःरूपस्यानुरूपाअवयवायस्यतंदृष्ट्वेतिशेषः।२३।चंद्रमौलिरित्यन्वयः।अथर्षेत्विकारः।चंद्रमौलिरस्तिगंगारूपं
यन्मूर्ध्नीदधारेत्यर्थः।हेआर्यत्वात्वांसाक्षात्प्रत्यक्षंब्रह्मर्षीणांतपएवमन्येकथंभूतंतपःवटुरूपंमूर्तिधरं।त्वच्चरणावनेजनैर्वा

यंमनोरमं।रूपानुरूपावयवंतस्माआसनमाहरत्॥२६॥स्वागतेनाभिनंद्याथपादौभगवतोबलिः।अवनिज्यार्चयामास
मुक्तसंगमनोरथं।२७।तत्पादशौचंजनकल्मषापहंसधर्मविन्मूर्ध्न्यदधात्सुमंगलं।यद्देवदेवोगिरिशश्चंद्रमौलिर्दधा
रमूर्ध्नापरयाचभक्त्या॥२८॥बलिरुवाच।स्वागतंतेनमस्तुभ्यंब्रह्मन्किंकरवामते।ब्रह्मर्षीणांतपःसाक्षान्मन्येत्वार्यवपु
र्धरं।२९।अद्यनःपितरस्तृप्ताअद्यनःपावितंकुलं।अद्यस्विष्टःक्रतुरयंयद्भवानागतोगृहान्।३०।अद्याग्नयोमेसु
हुतायथाविधिद्विजात्मजत्वच्चरणावनेजनैः।हतांहसोवार्भिरियंचभूरहोतथापुनीतातनुभिःपदैस्तथा।३१।यद्यद्ब
टोवांछसितत्प्रतीच्छमेत्वामर्थिनंविप्रसुतानुतर्कये।गांकांचनंगुणवद्धाममृष्टंतथान्नपेयमुतविप्रकन्यां।ग्रामा धाम४
१२ न्समृद्धांस्तुरगान्गजान्वारथांस्तथार्हत्तमसंप्रतीच्छ॥३२॥इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेबलिवामनसंवा
८ देऽष्टादशोऽध्यायः॥१८॥श्रीशुकउवाच।इतिवैरोचनेर्वाक्यंधर्मयुक्तंससूनृतं।निशम्यभगवान्प्रीतःप्रतिनंद्येदमब्रवीत्॥१॥
श्रीभगवानुवाच।वचस्तवैतज्जनदेवसूनृतंकुलोचितंधर्मयुतंयशस्करं।यस्यप्रमाणंभृगवःसांपरायेपितामहःकुलवृद्धःप्रशांतः२

५ र्हत्तमंहोअस्मतस्यमेपुनीतापवित्रीकृता।मेमत्तःप्रतीच्छगृहाण।हेअर्हत्तमश्रेष्ठतम।इत्यष्टमेऽष्टादशः।उक्तविशोकंहरिणायाचितं
तत्पदत्रयं।प्रतिश्रुतंतेनबलिनाजानन्भृगुरवारयत्॥१॥दातुःश्रुतिःस्वयंतुष्टिरित्यादिप्रश्नतोऽचितंवक्तव्यमितित्रिभिःश्लोकैस्तुशि
क्षयन्नाह।वामनःवचस्तवैतदित्यादिद्वाभ्यां।हेजनदेवपरायेपारलौकिकेधर्मपितामहःप्रह्लादःप्रमाणं॥२॥ राम

भा० अ०
१९

निःसत्वस्य लक्षणं। यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्ता। कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य यो वा न ददातीति॥२
... दानावसरे यस्मिन् युष्मत्कुले यो यस्मिन् जातः। हरिः द्वारे भूम्यां पादक्षरणेऽपराद्धश्च वहिर्दृष्टेः अतो हृदये स्थितं मानन् ज्ञास्य तोऽप्येवं निश्चित्य। स्वासा विलीनं तर्हितः स हरिः देहो यस्य विविग्नमतिकंपितं वेतो यस्य। अनुकंपितचित्त इति वा सर्वोऽर्थः। निर

नन्वेतस्मिन् कुले कश्चिन्निःसत्वः कृपणः पुमान्। प्रत्याख्याता प्रतिश्रुत्य यो वा दाता द्विजातये॥३॥ न सन्ति तीर्थे युधि वा र्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृप। युष्मत्कुले यद्यशसामलेन प्रह्लाद उद्भाति यथोडुपः खे॥४॥ यतो जातो हि रण्याक्ष श्चरन्नेक इमां महीं। प्रतिवीरं दिग्विजये नाविंदत गदायुधः॥५॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतं। आत्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन्॥६॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा। हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः॥७॥ तमायांतं समालोक्य शूलपाणिं कृतांतवत्। चिंतयामास कालज्ञो विष्णुर्मायाविनां वरः॥८॥ यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव। अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः॥९॥ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशे सुरेन्द्रः। श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः॥१०॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद। क्ष्मां द्यां दिशः खं विवरान् समुद्रान् विष्णुं विचिन्वन्न ददर्श वीरः॥११॥ अपश्यन्निति होवाच मया दृष्टमिदं जगत्। भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान्॥१२॥ वैरानुबंध एतावानामृत्योरिह देहिनां॥ अज्ञानप्र

राम
१९

दर्शात् अंतःप्रविष्टत्वात् पुमान् यतः सकाशान्नावर्तते तद्ब्रह्मवनलं गतः नित्यमुक्तत्वादिति वा सर्वोऽर्थः। एवं सर्वत्र पर्यन्विमरवं उविष्टो वैरं यत्कृतवान् तद्भवितमेतस्याप्रतिहं इमहावलपराक्रमस्य सूरोऽहं मानविज्रंभितक्रोधानुबंधस्य॥१३॥ कथं नामासौ सूरशिरोमणिर्जीवन्नेवकातरवदेर मुपेतवान् इत्याशयेनाह। वैरानुबंध एतावानामृत्योर्भवति हि देहिनां देहेऽनि

गृहाणि मानववांस्तराणां तथा अहंमानेनोपच्छंहितो मन्युश्च भवत्येव। अज्ञाननिवृत्ते ःआहृतायो रूपात्यागो मां द्यमेवेतार्थः
तदेव शर्वज्ञानस्कत्वात्तत्पितरं स्तौति पितेति द्विजवेषधारिणे देवाएते मत्तु द्विजाइति तद्विजानन्नपि सः याचितः मनुस्वी
यमायुर्देवेभ्योऽदात्॥ मम पदा संमितानीति त्रिविक्रमपदाभिप्रायेण। नवान्नतवादः तत्रापि स्वपदत्वानवगमात्। यावदर्थं वृ
त्तियहोयस्य सः यावदर्थं च ईश्वरस्यापि यच्याकारणं याञ्चाप्रकारं चोक्तं। बलेर्बंधनप्रश्नोत्तरत्वेनन स्वर्गवर्तिरेकेणा॥ धि

भुवोमन्युरहंमानोपच्छंहितं॥१३॥ पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः। स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात्स या
चितः॥१४॥ भवानाचरितान्धर्मानास्थितो गृहमेधिभिः। ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः॥१५॥ तस्मात्त्वत्तो
हं मही मीषद्वृणे वरदर्षभात्। पदानि त्रीणि दैत्येंद्र संमितानि पदा मम॥१६॥ नान्यत्ते कामये राजन्वदान्याज्जगदीश्व
रात्। नैनः प्राप्नोति वै विद्वान्यावदर्थप्रतिग्रहः॥१७॥ बलिरुवाच। अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः। त्वं बालो
बालिशमतिः स्वार्थं प्रत्यबुधो यथा॥१८॥ मां वचोभिः समाराध्य लोकानामेकमीश्वरं। पदत्रयं वृणीते योऽबुद्धिमा
न्द्वीपदाशुषं॥१९॥ न पुमान्मामुपव्रज्य भूयो याचितुमर्हति। तस्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे॥२०
श्रीभगवानुवाच॥ यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियं। नैकुर्वंति ते सर्वे प्रतिपूरयितुं नृप॥२१॥ ११

सोपपरकारमाह। अहो इति त्रिभिः। ते वाचो वृद्धानां संमताः त्वं तु बालः बालिशमतिश्च। बालिशानामज्ञानामिव मतिर्यस्य।
अतएव स्वार्थं प्रति यथावत्तबुधः वस्तुतस्तु बाल इव अबालिशमतिश्चेति श्लेषः स्वार्थं प्रत्यबुध इति च तत्त्वानामेवार्थं बुध्यसे न
स्वार्थं तु पूर्णस्य परिपूर्णस्य तव तद्व्यतिरेकेन स्वार्थाभावात् अर्थः अबुधत्वमेवाह मामिति द्वीपस्य दाशुषं दातारं। अबुद्धिमानिते
वं श्लेषः कामयते सम्यक्। पादप्रसारणेनेत्यर्थः अतएव तथा करिष्यति॥१९॥ पुनरपि निःस्पृहत्वमेवाविः कुर्वन्नाह। यावं

भा०अ० तद्यतिरूत्रिभिः नववर्षसमेतेन द्वीपेनापि प्राप्तानां द्वीपवराणां इच्छया। तदिच्छाया अंतं नगता इत्यस्माभिः श्रुतं असंतुष्टस्य
२२ प्रोहि त्रिभिर्लोकैरपिन सुखं वर्तते। सिद्धोहं कृतार्थः एतावतैवसर्वस्यापहारसिद्धेरितिगूढोभिप्रायः तदेवाह। वित्तंहि याव

त्रिभिः क्रमैरसंतुष्टो द्वीपेनापिन पूर्यते। नववर्षसमेतेन सप्तद्वीपवरेच्छया।२१। सप्तद्वीपाधिपतयो नृपावैण्यगया
दयः। अर्थैः कामैर्गतानांतं तृष्णाया इतिनःश्रुतं।२२। यदृच्छयोपपन्नेन संतुष्टोवर्त्तते सुखं। नासंतुष्टस्त्रिभिर्लोकै
रजितात्मोपसादितैः॥२३॥ पुंसोयंसंसृतेर्हेतुरसंतोषोर्थकामयोः। यदृच्छयोपपन्नेन संतोषोमुक्तयेस्मृतः॥२४॥
यदृच्छालाभतुष्टस्य तेजोविप्रस्य वर्द्धते॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः। तस्मात्त्रीणिपदान्येव वृणेत्व
द्वरदर्षभात्। एतावतैव सिद्धोहं वित्तंयावत्प्रयोजनं॥२६॥ श्रीशुक उवाच॥ इत्युक्तः सहसन्नाह वांछातः प्रतिगृह्यतां
।वामनायमहींदातुंजग्राहजलभाजनं।२७। विष्णवेक्ष्मांप्रदास्यंतमुशनाअसुरेश्वरं। जानंश्चिकीर्षितंविष्णोः शि
ष्यंप्राहविदांवरः।२८। श्रीशुकउवाच। एषवैरोचने साक्षाद्भगवान्विष्णुरव्ययः। कश्यपाददितेर्जातो देवानांकार्यसा
धकः।२९। प्रतिश्रुतंत्वयैतस्मै यदनर्थमजानता। नसाधुमन्येदैत्यानां महानुपगतोनयः।३०। एषतेस्थानमैश्व
र्यंश्रियंतेजोयशःश्रुतं। दास्यत्याच्छिद्यशक्राय मायावामनकोहरिः।३१। त्रिभिःक्रमैरिमाँल्लोकान्विश्वकायःक्रमिष्यति।
सर्वस्वंविष्णवेदत्वा मूढवर्तिष्यसेकथं॥ [illegible] तोगां पदैकेन द्वितीयेन दिवं विभोः [illegible]
र्तीयस्यकुतोगतिः॥३३॥ निष्ठांतेनरकेमन्ये ह्यप्रदातुः प्रतिश्रुतं। प्रतिश्रुतस्ययोनीशः प्रतिपादयितुंभवान्॥३४ राम

स्वयोजनमेवसर्वस्वंअधिकस्यक्लेशावहत्वादित्यर्थः। अनयस्त्वन्यायः अन्यायमेवाह। एषइति। मनुमयापद्त्रयमेव प्रति २०
श्रुतंनाधिकंतत्राह। त्रिभिरिति। क्रमतामिति वेत्तत्राह। सर्वस्वमिति।३२। तथापिप्रतिश्रुतंसंपादनीयमेवेतिचेत्तत्राह॥

क्रमतइतिद्वाभ्यां। एकेनपादन्यासेनत्रिंक्रममाणस्येत्यर्थः। तृतीयस्यतृतीयपदस्यानास्त्यात्तथापिसर्वस्वदानात्कीर्त्तिस्तुव
र्द्धिष्यतीतिचेत्तत्राह। नतद्दानमिति। तपः चित्तेः कार्याकर्मप्रवृत्तेः ननुतर्हिप्रतिश्रुत्यनेतिकथमनृतंवाच्यंतत्राह। सार्द्धैःप
ड्भिः। अत्रापिसत्यानृतव्यवस्थायांबह्वृचश्रुत्याहिप्रथमंओमितिसत्यंनेत्यनृतमित्यादिनासत्यानृतयोर्लक्षणपूर्वकंतत
तिनिंदाभ्यांसत्यंविहितंअनृतंचनिषिद्धं। अनंतरंस्वपराश्रयतद्विकमहारमित्यादिनासत्येदोषाननृतेगुणान्नुक्त्वात
स्मात्कालएवदद्यात्कालेनदद्यान्नतस्मादनृतंमिथुनीकरोतीत्युपसंहारेणवृत्तिसंकटादिष्वनृतमप्यनुज्ञानंतमिमंश्रु
त्यर्थंदर्शयिनाहत्रयोमित्यंगीकारेणयत्प्रोक्तंतत्सत्यंनेतियदाहतदेवानृतंतत्तुसत्यमीषदनृतंविनानसिद्ध्यतीत्याशयेनाह

नतद्दानंप्रशंसंतियेनवृत्तिर्विपद्यते॥ दानंयज्ञस्तपःकर्मलोकेवृत्तिमतोयतः॥३६॥ धर्मायययशसेर्थायकामाय
स्वजनायच। पंचधाविभजन्वित्तमिहामुत्रचमोदते॥३७॥ अत्रापिबह्वृचैर्गीतंशृणुमेसुरसत्तम। सत्यमोमितियत्प्रो
क्तंयन्नेत्याहानृतंहितं॥३८॥ सत्यंपुष्पफलंविद्यादात्मवृक्षस्यगीयते। वृक्षेजीवतितन्नस्यादनृतंमूलमात्मनः
॥३९॥ तद्यथावृक्षउन्मूलःशुष्यत्युद्वर्ततेचिरात्॥ एवंनष्टानृतःसद्यआत्माशुष्येन्नसंशयः॥४०॥ श्री॥

सत्यंपुष्पफलंविद्यात्। जानीयात्। आत्मवृक्षस्यदेहरूपवृक्षस्य। कुतः गीयतेश्रुत्योच्यतइत्यर्थः। प्रागंतरंतुसुगमं। यद्यपि
श्रुतावाचःसत्यंपुष्पफलंचेत्युक्तंतथापिवाचोदेहनिर्वाहाधीनतादात्मवृक्षस्येतिप्रसक्तानुसारेणोक्तं। भवतुपुष्पफलस्था
नीयंसत्यं [illegible]ः किमतआह। वृक्षेदेहेजीवतितत्पुष्पफलंनस्यात्। स्नानस्यादिविपाठेअक्षत्वात्कायावाचःपरामर्शःदेहस्यानृ
तेजीरदा [illegible] त्याह। अनृतंतवात्मनोदेहस्यमूलं॥३९॥ तदेवदृष्टांतेनस्पष्टयति। तद्यथावृक्षउत्पाटितमूलःशुष्यतितथाचिरादेवो
द्वर्ततेपतति। एवंनष्टमनृतंयस्यसआशुदेवःशुष्येत्। यद्यपिश्रुतावेवमेवानृतंवदन्नात्मानमाविर्मूलंकरोतीत्येवंनिंद्या

भा०स्क० ८ [illegible]मिति [illegible]स्युपसंहारात्तु शोरेणतत्केवलानृतविषयमितिव्याख्यातं देयत्वेतेनेतिवतयेवोक्तेः स्याच्चक्रति
३८ [illegible]मि [illegible]तिदेनतत्तुष्पं फलं वाचो यत्सत्यं सहेश्वरोयशश्रीकल्याणकीर्तिर्भवति।भोः पुष्पं हि फलं वाचः सत्सं वदत्
[illegible]वायदनृतं।तद्यथा हत्वग्राविमूलः पुष्यतिसद्धतैत एवमेवानृतं वदन्नाविमूलमात्मानं करोतिसस्युष्यतिसहतै
तेतस्मादनृतं नवग्रहोयेत्वेतेन अनेनतु अनृतं नदयेतसंकटेष्वात्मानं रक्षेदितिश्रुत्यर्थः सर्वथासत्यवचनेदेहानिर्वे
हेदितिस्फुटीकर्तुंसत्यस्य दोषानृतस्य चगुणानाह द्वाभ्यां।परागतिद्वाभ्यां।यदोमित्यक्षरं तत्पराकइत्यर्थे गृहीत्वावतीनि
पराग्रिक्तमपूर्णं वात्मक्षरं यत्तदोमिति॥ यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान्॥४०॥ भिक्षवे सर्वमोंकुर्व
न्नालं कामेन चात्मने॥ अथैतत्पूर्णम भ्यात्मं यच्च नेत्यनृतं वचः॥४१॥ सर्वं नेत्यनृतं ब्रूयात्सदुः कीर्तिः श्वस
न्मृतः॥४२॥ स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितं॥४३॥
इतिश्रीभागवते महापुराणे अष्टमस्कंधे वामनप्रादुर्भावे एकोनविंशोध्यायः॥१९॥ ।श्रीशुक उवाच॥
पराकरीक्तमितिश्रुतिपदस्य व्याख्यानं न्यपूर्णत्वं इति।ननु तस्मात्तदर्थिने यत्किंचिदोमिति दास्यामीति ब्रूयात्तेन रिच्येत शून्यो भवेत्
किंच भिक्षवे सर्वमोंकुर्वन्नात्मने कामेन नालं पर्याप्तो न भवति।तस्य भोगो न सिध्यतीत्यर्थः तथा च श्रुतिः पराग्रासतरिक्तमक्षरं
एतत्पूर्णं अर्थयथावदात्मध्या त्मकं चेति चकारान्वयः आत्मनो मिमुखमत्यस्यार्थमाकर्षतीत्याद्यात्मयोदिनित्यं ममकिंचि
दपिनास्तिसीदामातिब्रूतेअनृतेनपरेषामर्थानाकर्षतीतिप्रसिद्धं।४१।ननु तर्हि इदमनृतमेव सर्वदासेव्यं स्यात्तेनेत्याह।सर्वं
मिति।तथा च श्रुतिः अथैतत्पूर्णमभ्यात्मं यच्चेति मयत्सर्वं नेति ब्रूयात् यदेवच कामयकीर्तिर्जायेत सै [illegible] तेन्नेवदहन्यादितिश्च ३८

ति। हन्ति संकटादिष्वनृतं न दोषायेत्युपसंहरति। स्त्रीषु प्रोत्साहनेन वशीकरणे नर्माणि परिहासे विवाहे ववरादि स्तुतौ। गवां ब्राह्मणानां च हितार्थं हिंसायां च कस्यचित्प्राणात्यये। तथा च याज्ञवल्क्यः वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्। इति तथा च श्रुतिः तस्मात्कालएव दद्यात्। कालेन दद्यात्तत्सत्यानृते मिथुनीकरोतीति॥ अष्टमे एकोनविंशः॥ विंशे त्वनृतभीतो सोऽज्ञात्वापि कपटं हरेः। ददावेव ततो विष्णुः सहसा वर्द्धिता द्भुतं॥१॥ भगवता त्वया प्रोक्तं सत्यं किं तं। प्रोक्तं सत्यं किं त। योऽत्र्यर्थका

श्रीभा०स्कं० "बलिरेवं गृहपतिः कुलाचार्येण भाषितः॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुं॥१॥ बलिरुवाच। सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनां। अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित्॥२॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजं। प्रतिश्रुत्य ददामीति प्राह्रादिः कितवो यथा॥३॥ न ह्यसत्यात्परो धर्म इति होवाच भूरियं। सर्वं सोढुमलं मन्ये ऋतेऽली

८ कपरं नरं॥४॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात्। न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात्॥५॥ यद्यद्धा स्यति लोकेऽस्मिन्संपरेतं धनादिकं। तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत्॥६॥ श्रेयः कुर्वन्ति भूतानां साधवो दु स्त्यजासुभिः। दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु॥७॥ यैरियं बुभुजे ब्रह्मन् दैत्येन्द्रैरनिवर्तिभिः॥ तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि॥८॥ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः॥

[illegible] तेन गृहमेधिनां धर्म इति। कथं प्रत्याचक्षे निराकरोमि। ननु प्रत्याख्याते को दोषस्तत्राह। नाहमिति। [illegible] तोऽपि॥५॥ यद्यद्धनादिकं तत्सर्वं संपरेतं पुरुषं हास्यति त्यक्ष्यति चेत्तर्हि किमिति जीवतैव स्वयं न दद्यामिति [illegible] संकटपरिहारार्थं स्वदेहं ददत्यन्यानिति वेत्तत्राह। तस्येति। विप्रश्चेत्तेनार्थेन दत्तेनापि न तुष्येत्तर्हि तस्य त्यागे [illegible] विता वा वित्तादत्वा सद्दाने विप्रस्यासंतोषेण दानं व्यर्थमेव स्यात्। अतस्तद्याचितं सर्वं देयं भवति। [illegible] श्रेयः कुर्वन्ति स्वैरसुभिरपि को विकल्पो विचारः यैर्दैत्यैः। युद्धे अनिवर्तिभि

ग्रं० ग्र० रियंभूर्भुवं तु जेतप्रकृ...लतेषा मिहलोकान्परलोकान्वभोगानितिवा कालोग्रसीत्। तं हतवान्। ननु भुवि तेरधिगतं
प्राप्तं ...अतः कीर्तिरेव साध्या नान्यादिति भावः। देहत्यागादपि धनत्यागे कीर्तिर्भवतीत्याह। ८। सुलभा
नू९ इति। ...तत थातीर्थेपात्रे। अतोतिदुःकरो धनत्यागएवमयाकार्य इति भावः। तर्हिनिर्द्धनत्वेन दैन्यं स्यादि
ति चेन्न...मनस्विन इति। याच्ञापामप्यर्थिनां कामोपनयेनकामपूरणेन दुर्गतिर्दैन्यं नामितिवत्। ततशोभ
नंनेदृमेवा भवादृश्यां तु कामोपनयेन न दुर्गतिः। शोभनमिति किंपुनर्वक्तव्यमित्यर्थः॥१०॥

न तथा तीर्थआयाते श्रद्धयायैर्धनंत्यजं॥१०॥ मनस्विनः कारुणिकस्य शोभनंयदर्थिकामोपनयेन दुर्गतिः
रस्य २ कुतः पुनर्ब्रह्मविदां भवादृशां ततोवटोरस्य ददामि वांछितं॥११॥ यजंतियज्ञंक्रतुभिर्यमादृता भवंतआम्नायविधा
प्ये नकोविदाः॥ सएवविष्णुर्वरदोस्तुवापरोदास्याम्यमुष्मै क्षितिमीप्सितां मुने॥१२॥ यद्यप्यसावधर्मेणमांबध्नीयादन
नागसं। तथाप्येनंनहिंसिष्ये भीतंब्रह्मतनुंरिपुं॥१३॥ एषवाउत्तमश्लोको नजिहासतियद्यशः। हत्वामैनंहरेत या
युद्धेशयीतनिहितोमया॥१४॥ श्रीशुक उवाच॥ एवमश्रद्धितंशिष्यमनादेशकरंगुरुः। शशापदैवप्रहितः स
त्यसंधंमनस्विनं॥१५॥ दृढंपंडितमान्यज्ञस्तब्धोस्यस्मादुपेक्षया। मच्छासनातिगोयस्त्वमचिरात्भ्रस्यसे श्रियः।
१६॥ एवंशप्तः स्वगुरुणासत्यान्नचलितोमहान्। वामनायददावेनामर्चित्वोदकपूर्वकं॥१७॥ विंध्यावलिस्तदा
गत्यपत्नीजालकमालिनी। आनिन्येकलशंहैममवनेजन्यपांभृतं॥१८॥ यजमानः स्वयंतस्यश्रीमत्पादयुगंमु दा।

ननुनायंवटुः किंतु नव शत्रुर्विष्णुः इत्युक्तं। तर्हि सुतरामेव वदास्यामीत्याह यजंतीति। यः शत्रुर्वोक्तः। यद्यपि यशोन राम
जिहासति तर्हि युद्धे यमां हत्वा एतांभूमिं हरतो शयीत वा समक्ष्ज्ञातः सन्मम वृत्ते शयीतेति वास्तवोर्थः। अश्रद्धितंअज्ञा नू९
तश्रद्धं। जालकं मुक्ताभरविशेषः तत्त्वालावती अवनेजनीनामयाकलसंभृतंपूर्णं। अवदेत। वांछातः प्रगृह्यतामिति।

वलिना पूर्वे मुक्तौलाव् गुणत्रयमात्मनि यस्य तत्त। अन्तः एव भूःखमित्यादयो यद्यस्मिन् त्वा सस्थितवंत ॥२१॥ ऋत्विगा
दिसहितो वलिस्तस्य हरेः काये एतद्विश्वं ददर्श॥ तदेव प्रपंचयति। रसमितिपादोनैः सप्तभिः मारुतं गणं वायुसंइंद्रस्य सेनै

अवनिज्यां वहन्मूर्द्धिं तदपो विश्वपावनीः ॥ स्यात् तदा सुरैः इंद्रादिविदेवतागणागंधर्वविद्याधरसिद्धचारणाः। तत्कर्मस
वैविगृणंत आर्यवे प्रसन्नवर्षैर्वहुमुर्दाचिताः॥१९॥ नेडुर्मुडुर्डुडमयः सहस्रशो गंधर्वकिंपूरुषकिन्नराज्यगुः।
मनस्विनानेन कृतं सुडुःकरं विद्वानदद्यद्विपदे जगत्त्रयं॥२०॥ तद्वामनं रूपमवर्द्धताद्भुतं हरेरनंतस्य गुणत्रया
श्रो ४ त्मकं। भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यक् नृदेवा ऋषयो यदासत ॥२१॥ कायेवलिस्तस्य महाविभूते सहर्त्विगाचा
र्यसदस्य एतत्॥ ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तं॥२२॥ रसामचष्टांघ्रितलेथ पादयोर्महीं
महीध्रान्पुरुषस्य जंघयोः। पतत्रिणोजानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेन॥२३॥ [redacted] र्वासस्यिग्रह्मपे संध्यांविभो ६
त प्रजापतीन् जघने आत्ममुख्यान्। नाभ्यांनभः कुक्षिषु सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालां॥२४॥ हृद्यंग धर्मस्तन
योमुरारे ऋतं च सत्यं च मनस्यथेंदुः। ... ...॥ श्रियं च वक्ष
स्यरविंदहस्तां कंठे च सामानि समस्तरेफान्॥२५॥ इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि॥
केशेषु मेघान् श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं॥२६॥ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च
पं ५ विधिं च ... मस्तु। अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेधर एव लोभं॥२७॥ स्पर्शे च कामं नृपरेतसांभः पृष्ठे त्वधर्मं क्रम

वसेना ... ... इंद्रपदे स्थितत्वात्। एभुन्। आत्मास्वयं वलिमुख्यो येषां तान् ऋक्षमालां नक्षत्रपङ्क्तिं। अंग हे राजन्। समस्तात्रे
फं ... ... शब्दान्। द्यौश्च द्यां। रेतसां रेतसि। क्रमणे तु पादन्यासेषु। नृपधिजाती श्च प्राणेषु इंद्रियेषु सर्वात्मनातादिवा

... ...

तत्पदसंबंधेऽधिसतत् २ यएवधीतस्य वलिनमाचष्टे ३

भा० अ० ...मित्यादीनामीशमुपतस्थुरित्युत्तरेणान्वयः ॥३०॥ ।विद्याधरसंज्ञोसि।मीनकुंमलेमकरकुंडलेस्फुरं
धु०॥ ...तःमधुव्रतानांस्रजोयस्यातयावनमालयाश्रीवत्सगादिश्चाहृतोवासः ॥उरुक्रमत्वमेवाह॥क्षितिमितिद्वि
तीयंपदंक्रमतोविक्षिपतस्तद्विपिष्टपंकिंचिन्नदीयंकिंचन्मात्रंजातं।तृतीयायतुनाकिंचिदपितत्र हेतुः उरुक्रमस्यांघ्रिस्त्रि
णेषुयत्रं।छायावमृत्युंहसितेचमायांतनूरुहोह्योषधिजातयश्च॥२८॥नदीश्चनाडीषुशिलानखेषुबुद्धावजं
देवगणानृषीश्च।प्राणेषुगात्रेस्थिरजंगमानिसर्वाणिभूतानिददर्शवीर॥२९॥सर्वात्मनीदंभुवनंनिरीक्ष्यसर्वेसु
राःकश्मलमापुरंग।सुदर्शनंचक्रमसह्यतेजोधनुश्चशार्ङ्गंस्तनयित्नुघोषं।पर्जन्यघोषोजलजःपाञ्चजन्यः।कौमो
दकीविष्णुगदातरस्विनी॥३१॥विद्याधरोसिःशतचंद्रयुक्तःतूणोत्तमावक्षयशायकौच।सुनंदमुख्याउपतस्थु
रीशंपार्षदमुख्याःसहलोकपालाः॥३३॥लशत्किरीटांगदमीनकुंडलःश्रीवत्सरत्नोत्तममेखलांबरैः॥मधुव्रतस्र
ग्वनमालयावृतोरराजराजन्भगवानुरुक्रमः॥३४॥क्षितिंपदैकेनबलेर्विचक्रमेनभःशरीरेणदिशश्चबाहु
भिः।पदंद्वितीयंक्रमतोस्त्रिविष्टपंनवैतृतीयायतदीयमण्वपि।उरुक्रमस्यांघ्रिरुपर्युपर्यथोमहर्जनाभ्यांतपसः
परंगतः॥३४॥ ॥इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेविश्वरूपोनामविंशोध्यायः॥२०॥ श्रीशुकउवाच।सत्यंस
मीक्ष्याब्जभवोनखेंदुभिर्हतस्वधामद्युतिरावृतोभ्यगात्।मरीचिमिश्राऋषयोबृहद्व्रताःसनंदनाद्यानरदेवयोगिनः॥१॥

नारूत पिष्टपादुपर्युपरिगच्छन्महर्जनाभ्यांतपश्चपरंगतःसत्यलोकंगतइति।अष्टमेविंश॥२०॥एकविंशेपदाक्रांतिमिषेणबलिबंधनं।
विस्तुत्कर्षतस्सख्यापयितुंजने॥१॥उरुक्रमस्यांघ्रिस्तपसःपरंगतइत्युक्तं।ततःकिंवृत्तंतत्राह।सत्यंसोत्यलोकंप्राप्तंतदंघ्रिंसमी
क्ष्याब्जभवोभ्यगात्।तथामरीचिमिश्रादयश्चेतिद्वयोरन्वयःकथंभूतोब्जभवोहरेरंघ्रिनखाएवेंदवःतैर्हतास्वधाम्नोद्युतिर्यस्यसः
स्वयंचैतेरावृतः।व्रत्तहेनरदेवबृहद्व्रतायोगिनश्च॥१॥

पुनर्वीमप्यादिविक्षेपाय ३

दक्षिणेन

राम
४०
१

ऋंगानि शिक्षादीनि पुराणानि तत्संहिताश्च योग एव समीरितं वा तमेवाग्निस्तेन रंधितं दग्धं कर्म कल्मषं कर्ममूलं येषां ते सर्वे
तमंघ्रिं ववंदिरे यस्यांघ्रेः स्मरणानुभावतः अकर्मकं कर्मभिरप्राप्यं। विष्णो रंघ्रयो। स्वयं यस्य नाभिपंकेरुह संभवः तस्यांघ्रेरिंद्रा गप्ति स
मभ्यर्च्य लोकत्रयं निमार्ष्टि पवित्रयति वा। संक्षिप्तत्त्व संहितास्त्वात्म विश्रुती स्वविस्तारो येन तस्मै यथा पूर्वं वामन रूपेण स्थिता
वेदोपवेदा नियमानयान्विता स्तर्केतिहासांग पुराण संहिताः। ये चापरे योग समीरदीपित ज्ञानाग्निना रंधित क
र्मकल्मषाः। ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकं॥२॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्प
द्मभवोर्हणोदकं। समर्च्य भक्त्याभ्यगृणा च्छुचिश्रवा यन्नाभिपंकेरुह संभवः स्वयं॥३॥ धातुः कमंडलुजलं तदुरुक्रमस्य
पादावनेजनपवित्रतया नरेंद्र। स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्त्तिः॥४॥ ब्रह्मादयो लो
अ ५ कनाथाः स्वनाथाय समाहृताः॥ सानुगा बलिमाजह्रुः संक्षिप्तात्म विभूतये॥५॥ तोयैः समर्हणैः स्रग्भिर्दिव्य गंधानुलेप
नैः। धूप दीपैः सुरभिभिर्लाजाक्षत फलांकुरैः॥६॥ स्तवनैर्जयशब्दैश्च तद्वीर्य महिमांकितैः। नृत्यवादित्र गीतैश्च शंख
दुंदुभि निःस्वनैः॥७॥ जांबवानृक्षराजस्तु भेरीशब्दैर्मनोजवः। विजयं दिक्षु सर्वासु महोत्सवमघोषयत्॥८॥ महीं
सर्वां हृतां दृष्ट्वा त्रिपद व्याजयाच्ञया। ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः॥९॥ न वायं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः
द्विजरूप प्रतिच्छन्नो देवकार्यं चिकीर्षति॥१०॥ अनेन याचमानेन शत्रुणा वटुरूपिणा सर्वस्वं नो हृतं भर्तुर्न्यस्त दंडस्य बर्हिषि

[illegible]॥ नैवेद विषयाव्याजयाकपटयाच्ञया सत्यभर्त्तुर्बलेर्महीं हृतां दृष्ट्वा ऊचुः॥९॥ तदाह। नवेश्ति सा दैवि त्रिभिः। अ
[illegible] सुरास्य। अर्थहतत्र अनुकूलः स्तं कालं मति वर्तितुं प्रमाननीश्वरः समर्थो न भवति॥ इत्यर्थः॥ श्रीराम
[illegible]॥ = ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्रीलक्ष्मायनमः। श्रीराम
[illegible]

[illegible]षेणासुराणां। तत्रादत्तं नूनमिति परोक्षः शत्रुच्छलेन वर्त्तमानः शत्रुत्वं पुनर्भक्तानि वास्मानत्र ग्रहीतुमेवाह
[illegible]दीक्षितस्य विशेषतः।।नोच्यते भाषितुं शक्यं ब्रह्मण्यस्य दयावतः।।१२।।तस्मादस्य वधे धर्मो
भर्त्तुः शुश्रूषणं च नः।इत्यायुधानि जगृहुर्वलेरनुचरासुराः।।१३।।ते सर्वे वामनं हंतुं शूलपट्टिशपाणयः।अनि
च्छतो वले राजन् प्राद्रवन्जातमन्यवः।।१४।।तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप।प्रहस्यानुचरा विष्णोः प्रत्य
षेधन्नुदायुधाः।।१५।।नंदः सुनंदोथ जयो विजयः प्रवलो वलः।कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट्।।१६।।जयंतः
श्रुतदेवश्च पुष्पदंतोथ सात्वतः।सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीं।।१७।।हन्यमानान्स्वकान्दृष्ट्वा पुरुषा
नुचरैर्वलिः।वारयामास संरब्धान् काव्यशापमनुस्मरन्।।१८।।हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः।मा युध्य
त निवर्त्तध्वं न नः कालोयमर्थकृत्।।१९।।यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये।तं नातिवर्त्तितुं दैत्याः पौरुषैरीश्व
रः पुमान्।।२०।।यो नो भवाय प्रागासीदभवाय दिवौकसां।स एव भगवानद्य वर्त्तते तद्विपर्ययं।।२१।।वलेन सचिवै
र्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः।सामादिभिरुपायैश्च कालं नात्येति वै जनः।।२२।।भवद्भिर्निर्जिता ह्येते वहुशोनुचरा ह
रेः।दैवेनर्द्धास्त एवाद्य युधि जित्वा [illegible] नदंति नः।।२३।।एतान्वयं विजेष्यामो यदि दैवं प्रसीदति
तस्मात्कालं प्रतीक्षध्वं यो नोर्थत्वाय कल्पते।।२४।।श्रीशुक उवाच।पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः।रसां नि
र्विविशु [illegible] राजन्विष्णुपार्षदताडिताः।।२५।।अथ तार्क्ष्यसुतो
ज्ञात्वा विराट्प्रभुचिकीर्षितं।ववंध वारुणैः पाशैर्वलिं सुत्येहनि क्रतौ।।२६।।हाहाकारो महानासीद्रोदस्योः सर्वतो दिशं।
विराजत इति विराट् प्रभोरस्य चिकीर्षितं ज्ञात्वा तार्क्ष्यसुत अयमर्थः अस्य सर्वस्वापहारेण मम मे त्यभिमानं त्याजये दानीं देहस्वीकारेणाहंकार

यपित्याजयपित्वांपरमा तुग्रहं कर्तुमिच्छति। नवानेनतुल्यान्यः कोपि समस्त[illegible]योधरोवाल्ली तितद्यशः प्रख्यापनार्थं किंचित्
द्यातपितुमपीच्छतीतित्रमोरप्यभिप्रायं ज्ञात्वानं वदंभेति। सत्येहनिसोमाभिषूयत्हिने। गोदस्योः द्यावाप्रथिवोः अत्रसोमसूर्यः

ध्रियमानेसुरपतौ विष्णुनाप्रभुविष्णुना॥२७॥ तंबंधंवारुणैः पाशैर्भगवानाहवामनः। नष्टश्रियंस्थिरप्रज्ञमुदारयश
सं नृप॥२८॥ पदानि त्रीणिदत्तानि भूमेर्मह्यंत्वयासुर। द्वाभ्यांक्रांतमहीसर्वा तृतीयमुपकल्पय॥२९॥ यावत्तपत्यसौगो
भिर्यावदिंदुः सहोडुभिः। यावद्वर्षति पर्जन्यस्तावती भूरियंतवागृणा॥ पदैकेनमयाक्रांतो भूर्लोकः खंदिशस्तनोः। स्व
र्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मनः॥३१॥ प्रतिश्रुतमदातुस्ते निरये वास इष्यते। विश त्वं निरयंतस्माद्गुरुणा
चानुमोदितः॥३२॥ वृथामनोरथस्तस्य दूरः स्वर्गः पतत्यधः। विप्रलब्धोददामीति त्वयाहंचाढ्यमानिना॥३३॥ विप्रलंभ
फलं भुंक्ष्व निरयं कतिचित्समाः॥३४॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे बलिनिग्रहे एकविंशोऽध्यायः॥२१॥ श्रीशुक
उवाच। एवं विप्रकृतोराजन्बलिर्भगवतासुरः। भिद्यमानोप्यभिन्नात्मा प्रत्याहाविक्लवं वचः॥१॥ बलिरुवाच। यद्युत्त
मश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते। करोम्यृतंतन्नभवेत्प्रलंभनं पदंतृतीयं कुरु शीर्ष्णि मे निजं॥२॥

मया अत्मनेत्यन्वयः व्यापिनेत्यर्थः वो विश्वात्मनोः॥२१। द्वाविंशेतुप्रसन्नः सन्प्रह्लादस्य सुतलं बलिं। दत्वा वैशान् हरिर्न्यृनं म
त्वातद्वारयोभवत्॥१॥ समर्पित तन्नविन्तनिर्मलाचलभक्तितः छलितोवलिनाचित्रं स्वमेव वार्यपरञ्जुतः॥१॥ विप्रकृतः ऋत्र
तः भिद्यमानः हे उत्तमश्लोकेति करादत्तः ममवचः ईरितं प्रतिश्रुतं नताबह्यलीकंत्वयाकेटनवामनरूपयाभिज्ञात्वारूपांतरस्या
[illegible]न्। एवमपि यदि भवान्व्यलीकं मन्यते तथापि सत्यमेवाहं करोमि यदुक्तं विप्रलंभनंन भवतु मशीर्ष्णिनिजंतृतीयं पदं
कुरु [illegible] विश्वं क्रांतवतः तव मे शिरः पदपर्याप्तं न भवतीति मन्येथा वित्तेन चेत्पदं [illegible] जातं तदा इदमधिकमेवस्यात्। वित्तादपि

प्रतिश्रुतस्यादाने नयोऽर्थिनं विप्र लंभते ४

ना० = ८ विक्लवतो ... दिति भावः ननु च त्वमपदार्थैर्बन्धनं रज्वेद्दारारज्वेह्वनैरपि। आत्मानं सततं रज्वेद्दारैरपि धनैरपीत्यादि वचनादात्मभ
४२ यप्रतिहारायसर्वस्वं त्यज कुतो भीतः सन्नात्मानमर्पयसित्यत आह विभेमिमिति॥२॥ असाधुवादात् अपकीर्तेर्यथा भृशमुद्विजे
तथा निरयादिभ्यो न बिभेमि। ननु मया निग्रहात्तवापकीर्तिर्जातेव नैवेत्याह॥३॥ पुसामिति। अर्हत्तमैरर्पितं यं दंडं मात्रादयो
पि न हि आदिशंति। नैवार्पयंति। हितैषिणात्वया निग्रहीतोहं श्लाघ्य एव वास्मीति भावः॥४॥ नत्वहं देवानां हितैषिणा सुराणां
तत्राह त्वं नूनमिति। परोक्षः शत्रुच्छलेन वर्त्तमानः शत्रुत्वं पुनर्भक्तानि वाल्मानग्रहीतुमेवाह। यस्मिन्निति। उग्रहोहं श्लसिद्धं।

विभेमि नाहं निरयात्त्वदच्युतो न पाशबंधाद्व्यसनादुरत्ययात्। नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा॥
२॥ पुसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं। यं न माता पिता भ्राता सुहृदश्चादिशंति हि।४। त्वं नूनमसुराणां नः पारोक्षः परमो गुरुः
यो नोनेकमदांधानां विभ्रंशं चक्षुरादिशत्॥५॥ यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः बहवो लेभिरे सिद्धिं यामु हैकांतयोगि
नः॥६॥ तेनाहं निगृहीतोस्मि भवता भूरिकर्मणा। बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे।७॥ पितामहो मे भवदीयसंमतः
श्र ३ प्रह्लाद आविष्कृतसाधुवादः। भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा॥८॥ किमात्मनानेन जहाति योंततः
पुत्रे २ किं रिक्थहारैः स्वजनाख्यदस्युभिः। किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः॥९॥ इत्थं स निश्चि
त्य पितामहो महानगाधबोधो भवतः पादपद्मं। ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तम॥१०॥ ॥

अतो नाममज्ञानात्पिंडुः खमित्याह। तेन गुणा भवता किंचयोयं दंडरूपो ममानुग्रहः त्वया कृतः सतर्क्षपोत्रत्वेन नत्वदनुग्रहस्यपा राम
त्रमित्याशयेनाह।५। पितामहस्मिति। भवदीयानां संमतः आविष्कृतः साधुवादोयस्य त्वमेव परम आश्रयो यस्य सः अतो भवतो विपक्षेयस्ते ४२
न विपक्षिणा हिरण्यकशिपुनां विचित्रं वैशसं हिंसां संप्रापितोपि देहादीनामसारतां निश्चित्य कुतोभयं ध्रुवं च भवतः पादपद्ममेव प्र
पेदे॥ अथ तस्मादहमपि देवेन तस्यैव भाग्येन तवांतिकं नीत इति वक्तुमाम हारेणार अंततः आयुषोंते रिक्थहारैः पुत्रैः। इह गेहे पुके

प्रसंभवलात्त्याजिताश्रीर्यस्य यया श्रिया लब्धमतिः स न पुमानिहंजीवितमकु[illegible]ध्यते। कथं स तं कृतांतस्यांतिकवर्त्तिं स्थित्योः
मन्निहितं राकापतिः प्रोद्यदुडुः अंजनत्विषं श्यामं। स्वकृताहंकारादिरूपापराधस्मरणे न सव्रीडितं नीचीनमधोमुखं यस्य सः शि
रसा नमन्नेव उपेत्य मूर्ध्ना ननाम। बलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिः विकलः स्वपति। न त्वेङ्ग परमेत हीयं त्वयापकृतं सी
यमेव पुनः स्वीकृतः ततः शोभनमेव वृत्तं। तस्मै तत्र हेतुः मन्ये इति। यद्यस्मात् श्रीपरवयदात्ममोहने तस्माद्भ्रंशितः मोहनत्वमेवाह।

अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजिताश्रीः। इदं कृतांतांतिकवर्त्तिजीवितं यया ध्रुवं स्तब्धमतिर्न्न बुध्यते
॥११॥ श्रीशुक उवाच। तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः। आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥१२॥ तमिंद्रसेनः।
स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणं। प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥१३॥ तस्मै बलिर्वा
रुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत्। ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥१४॥ स तत्र
हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं। उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥१५॥ प्र
ह्लाद उवाच। त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं। मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्म
मोहनात् ॥१६॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा। तस्मै नमस्ते जगदीश्वराय नारायणायाखिललो पएग। २
कसाक्षिणे ॥१७॥ श्रीशुक उवाच। तस्यानुशृण्वतो राजन्प्रह्लादस्य कृतांजलेः। हिरण्यगर्भो भगवानुवाच मधुसूदनः ॥१८॥

यया श्रिया विद्वानपि यतः संयतोऽपि मुह्यते। तत् तस्यात्मनः स्वां कोन्यः पुमानात्मनो गतिं। त्वं यथावद्धि विचष्टे पश्यति। तस्मै महाकारिण
कः ॥१७॥ तस्य प्रह्लादस्यानुशृण्वतो उवाचेति किंचिद्वक्तुं प्रवृत्त इत्यर्थः। तदेव विध्या बलेरपि व कुप्रवृत्ता। तां च संमान्य यनहि
रण्यगर्भः [illegible]स्थितः अत एतस्यायव वाक्यं प्रथमम् अवतारयति त्रिजगतः कर्त्तुं प्रभोः पालस्य तः संहर्त्तुं ईश्वरस्य तवान्ये

भा० अ० शिरा वहंति। कि समर्पयंति त्वया वरोपितः कर्तृवादः कर्तारः स्वतंत्रा वयमिति वादमपि येषां ते अयं भावः लोकत्रयं मयार्पि
५२ तं तत्रतीयं पादं देहं समर्पयं प्रतिश्रुतमृतं करोमीति देहादिषु स्वाम्याधिकारेण ब्रुवन्नयं कुबुद्धिर्निग्राह्यः स्त्रीयस्वमेव सर्वस्या
पि स्वामी स्वतो मे स्वबुद्धिमेनं केवलं कृपया विमुच्य पालयेति। तदेवं प्रह्लादस्य विंध्यावलेश्च परमार्थोक्त्या प्रसन्नो हरिः ब्रह्म

वद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला। प्रांजलिः प्रणतोपेंद्रं बभाषे वाङ्मुखी नृप॥१९॥ विंध्यावलिरुवाच। क्रीडार्थमात्म
न इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युः कर्तुः प्रभोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्वदवरोपितक श्लो २
र्तृवादाः॥२०॥ ब्रह्मोवाच। भूतभावन भूतेश देवदेव जगन्मय। मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं॥२१॥ कृत्स्ना
तेनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये। निवेदितं च सर्वस्वमात्मविक्लवया धिया॥२२॥ यत्पादयोरशठधीः सलिलं प्र ८४
दाय दूर्वांकुरैरपि विधाय सतीं सपर्यां। अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत्॥
२३॥ श्रीभगवानुवाच। ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहं। यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते॥२४॥ यदा
कदाचिज्जीवात्मा संसरन्निजकर्मभिः। नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत्॥२५॥ जन्मकर्मवयोरूपविद्यैश्वर्य
धनादिभिः। यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः॥२६॥ मानस्तंभनिमित्तानां जन्मादीनां समंततः। सर्वश्रेयःप्रतीपानां हंत मुह्येन्न जन्मादिनां २

तु लोकः कर्हिचिद्वविज्ञापयति॥२०॥ भूतभावनेति त्रिभिः। निग्रहानर्हत्वे हेतुः। कृत्स्नेति सर्वस्वमेवाह। आत्मेति। तदेवं केमुत्यन्यायेन
ह। यत्पादयोः सलिलमात्रमपि प्रदाय सर्वोपि जनाउत्तमां गतिं प्राप्नुवंति तस्मै तु भ्यमसौ बलिः त्रिलोकीं दाश्वान्द‍त्तवा धनु
न्नयं कथं ग्रानुयात्॥२३॥ तस्य विशः ऐश्वर्यादीन् नचायं प्रहारः कोयमनुग्रहः यन्मदः यैरैश्वर्यैर्मदो यस्य सः अत एव स्तब्धः नम्र
स नमस्तनेहत्तनामर्थानामपहार एवानुग्रहस्तर्थः इत्थं भगवतः प्रजन्मकर्मादि वतो जीवस्य जन्मादिनिमित्तो गर्वो महाहा

निकरोतस्यचनाशोमहानुग्रहादेवेत्याह।२४॥ यदेतिद्वाभ्यां। अनीशः परतंत्रः सन्निजैः कर्मभिर्नानायोनिषु कृमिकीटादिषु
संसरन्नुतत्रयोनिषु भोगतो जन्मादिभिरस्य यदि स्तंभो न भवेत्। तर्हि धनादिभ्यो यसंमदोहरामीति चेत्तत्राह। मानस्तंभः अनश्रुता
तस्य निमित्तभूतानां समंततः सर्वश्रेयः प्रतिकूलानां जन्मादीनां सत्वे। पिजन्मादिभिरिति विर्वहेत। हि यस्मात्परो न मुह्येत। अतो
भक्तस्य त्वया संपदो पिहरामि। अभक्तस्य तु सेति तद्व्यहाररूपमेव तस्यानुग्रहं करोमीति भावः। अस्य वैरानां मत्परत्वादन्येऽपि
माया
मत्परः॥२७॥ एष दानवदैत्यानामग्रणीः कीर्त्तिवर्द्धनः। अजैषीदजेयां सीदन्नपि न मुह्यति। क्षीणरिक्थश्च्युतः स्था
नात् क्षिप्तो बद्धश्च शत्रुभिः। ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः॥२९॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः। छिलै
रुक्तो मया धर्मो नायं त्यजति सत्यवाक्॥३०॥ एष मे प्रापितः स्थानं दुःप्राप्यममरैरपि। सावर्णेरंतरस्यायं भवितेंद्रो मदाश्र
यः॥३१॥ तावत्सुतलमध्यास्तां विश्वकर्म्मविनिर्मितं। यन्नाधयो व्याधयश्च क्लमस्तंद्रा पराभवः। नोपसर्गा निवसतां संभ
वंति ममेक्षया॥३२॥ इंद्रसेन महाराज याहि भो भद्रमस्तु ते। सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः॥३३॥ न त्वामभिभ
विष्यंति लोकेशाः किमुतापरे। त्वच्छासनातिगान्दैत्यान् चक्रं मे सूदयिष्यति। रक्षिष्ये सर्वतोहं त्वां सानुगं सपरिच्छदं।
सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान्॥३५॥ तत्र दानवदैत्यानां संगात्ते भाव आसुरः। दृष्ट्वा मदनुभावं वै सद्यः कुंठो वि
नंक्ष्यसि॥३६॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे बलिमोक्षणं नाम द्वाविंशोऽध्यायः॥२२॥ श्रीशुक उवाच॥ ।
प्राप्यमपि दास्यामीति वक्तुं तस्य मोहाभावमाह।२७। एष इति त्रिभिः न होतिस्मिन्कुले कश्चिन्निःस्वत्वः कृपणः पुमान्नित्यादि नान्वै
रेव मया धर्मछलैः तथापि तं धर्ममयं न त्यजति। अतः सत्यवाक्॥ मम वा अहमेवाश्रयः पालको यस्य सः॥३१॥ स्था
नं प्रापितः इति यदुक्तं तदेव स्थानमाह। तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तां अधिवसतु लिंगर्थः। यत्र स्मिन्निवसतां आ

भा०अ० आरयोममस्यानुसंभवंति॥ एवंब्रह्माणंवस्तुस्नाकस्तणापरवश्यःसाक्षाद्धिलिंप्रत्याह॥२२॥ इंद्रसेनेतिचतुर्भिःत्वप्रासनंप्र
पृ४ तिरा अतिक्रमंतिवर्ततइतितथा॥तयापिभगाद्यियोगाद्दित्तदनिच्छंतंप्रत्याह।मदेति।संगाद्यग्रास्तुरोभावःसविनंद्वप्तिाअष्ट
महद्वंविसः। ।त्रयोविंशेवलोयातिसुतलंसपितामहे।उपेंद्रेणादिवंगत्वापूर्ववन्मोदतेहरिः॥१॥वाष्पकलाभिर्विंदुभिरा
कुलेइक्षणेयस्यसउत्कलःउत्कंठः॥१॥अहोत्वच्चरणनमस्यमहिमायदर्थंकृतःसमुद्यमपववप्रपन्नानांयोर्थःतस्यविधावभक्ते

इत्युक्तवंतंपुरुषंपुरातनंमहानुभावोखिलसाधुसंमतः वद्धांजलिर्वाष्पकलाकुलेक्षणोभक्त्युत्कलोगद्गदयागिराब्रवीत॥१॥
वलिरुवाच॥ अहोप्रणामायकृतःसमुद्यमःप्रपन्नभक्तार्थविधौसमाहितः यल्लोकपालैस्त्वदनुग्रहोमरैरलब्ध
सटे पूर्वोपसदेसुरेर्पितः॥२॥ श्रीशुकउवाच॥ इत्युक्त्वाहरिमानम्यब्रह्माणंसभवंततः।विवेशसुतलंप्रीतोवलिर्मुक्तःसहासुरैः॥३॥
एवमिंद्रायभगवान्प्रत्यानीयत्रिविष्टपं।पूरयित्वादितेःकाममशास्तसकलंजगत॥४॥लब्धप्रसादंनिर्मुक्तंपौत्रंवंशधरं स८
वलिंनिशाम्यभक्तिप्रवलःप्रह्लादइदमब्रवीत॥५॥प्रह्लादउवाच नेमंविरिंचोलभतेप्रसादंनश्रीर्नशर्वःकिमुताप
रेते।यन्नोसुराणामसिदुर्गपालोविश्वाभिवंद्यैरभिवंदितांघ्रिः॥६॥यत्पादपद्ममकरंदनिषेवनेनब्रह्मादयःशरणदा
श्नुवतेविभूतीःकस्माद्वयंकुसृतयःखलयोनयस्तेदाक्षिण्यदृष्टिपदवींभवतःप्रणीताः॥७॥ ।श्रीरामायनमः।

पितस्यसंपादनेसमाहितःअप्रमत्तःयत्तयेनोद्यमेनलोकपालैरमरैःसत्वप्रधानैःअधिकैरलब्धपूर्वस्त्वदनुग्रहःअपसदेनी
चेऽसुरेमयिअर्पितःअयंभावःपरमेश्वरायतुभ्यमहंवराकस्त्रिलोकीदत्तवानित्येतदास्तांप्रणामोपिनसम्यक्कृतःकिंतु
तदर्थमुद्यममात्रंकृतं।तेनवकर्मतपोदानादिकोटिभिरलभ्यस्त्वदनुग्रहःसंपादितःअहोत्वच्चरणमाहात्म्याश्चर्यमिति।अ ३३
शासत्उपेंद्रःसन्पालयामासदुर्गपालोनिरक्षिषेसर्वतोहमितिनिक्तात्।हेशरणदअम्प्रयच्छ।येकुसृतयःदुर्वृत्ताः

खलयोनयः। अयजातयः। चैते वयं तस्सतव ते दाक्षिण्यं दृष्टेः पदवीं कस्माद्धेतोः प्रणीताः वड्डमानेन विज्ञानुवर्त्तनं दाक्षिण्यं
तेन याइष्टिं त्वद्विषयतां प्रापिताः॥७॥ ।भक्तप्रियत्वादिति चेत्। तर्हि एवं चेहितं अहो चित्रं किं ततस्सर्वात्मनः समदृशश्च स्व
भावो विषम इति यत् सर्वात्मत्वे चित्रचरितत्वे हेतुः अमिता अचिंत्या योगमाया तया लीलातया विसृष्टानि विरचितानि भु
वनानि येन तस्य। अहो इत्यत्र संधिरार्षः समदृक्त्वे हेतुः विशारदस्य अथवा भक्तप्रियत्वे पितवैषम्यं नास्सेव यतः कल्पतरु

चित्रं तवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य। सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो य
दसि कल्पतरुस्वभावः॥८॥ श्रीभगवानुवाच॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयं। मोदमानः स्वपौत्रेण ज्ञातीनां सुखमा
वह॥९॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितं। मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः॥१०॥ श्रीशुक उवाच॥ आज्ञां भ
गवतो राजन्प्रह्लादो बलिना सह। बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः॥११॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपति
प्रणतस्तदनुज्ञातः प्रविवेश महाबिलं॥१२॥ अथाहोशनसं राजन्हरिर्नारायणोंतिके। आसीनमृत्विजां मध्ये सदसि ब्रह्म
वादिनां॥१३॥ ब्रह्मन्संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः। यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत्॥१४॥ श्रीशुक्र उवाच॥ कु
तस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान्। यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः॥१५॥ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः॥

रस्य स्वभावः सन् भक्तप्रियोसि नहि कल्पतरुराश्रितानामेव कामान्पूरयन्नपि विषमो भवतीत्यर्थः। मद्दर्शनेन यो महाह्लादस्तेन ध्वस्तं
कर्मबंधनमज्ञानं यस्य। कर्म वितन्वतः शिष्यस्य यत् छिद्रं अंतरं न्यूनं जातं तत् संतनु विस्तारय संधत्स्व। यजमानं विना कथं संधात
व्यमिति न वाच्यमित्याह। यत्तदिति। ब्रह्मादृष्टं ब्राह्मणैर्दृष्टमेव समं भवेत् किं पुनरनुष्ठितमित्यर्थः॥१४॥। भवान्यस्य सर्वे
त्वापि भावेन वल्कमात्रेण पूजितः तस्य कर्म तु कुतो वैषम्यं। कथंभूतः कर्मणामीश्वरः प्रवर्तकः यज्ञेशः यज्ञफलदः यज्ञपश्च पु

भा०अ०स्कं०८ तयश्च तं तावत् ज्ञायस्मात् मंत्रतः स्वरादिभ्रंशेन तंत्रतः स्रुक्स्रुवादिना देशतः कालतश्च अर्हतः पात्रतः वस्तुतश्च दक्षिणादिना
४५ यच्छिद्रं न्यूनं तत्सर्वं तव नामकीर्तनमात्रमेव निःछिद्रं करोतीति। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति
सद्यो वंदे तमच्युतं हरेराज्ञां प्रतिनंद्य बलेर्यज्ञच्छिद्रं समाधत्त स्वदध्यौ पयंतरितसमाधायताम् आज्ञां संपालयिष्ये वाचि तिशेषः देवाश्च ऋ
षयश्च भूमिपाश्च मनवः तैः सहितः न तु लोकादीनां पतिरिंद्रोस्त्वेव सत्यं तथापि। वेदादीनां कल्पं पालनेद्धम। वामनमुपेंद्रं कल्प
सर्वं करोतीति निश्छिद्रं नाम संकीर्तनेन तव॥१६॥ तथापि वदतो भूमन् करिष्याम्यनुशासनं। एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपा
शुक्र उवाच २ लनं॥१७॥ अभिनंद्य हरेराज्ञामुशना भगवानिति। यज्ञच्छिद्रं समाधाय बलेर्विप्रर्षिभिः सह।१८। एवं बलेर्महीं राजन्भि
क्षित्वा वामनो हरिः। ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं॥१९॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः। दक्षभृग्वंगि
स्या रोमुख्यैः कुमारेण भवेन च॥२०॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च। लोकानां लोकपालानामकरोद्वामनं पतिं।२१
वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः। मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः।२२। उपेंद्रं कल्पयांचक्रे पतिं सर्वा
विभूतये। तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप।२३। ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं। लोकपालैर्दिवं निन्ये ब्रह्मणा
चानुमोदितः॥२४॥ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः।२५। ब्रह्मा शर्वः कु
मारश्च भृग्वाद्या मुनयो नृप॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये।२६। सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतं॥ धिष्ण्या द
नि स्वानि ते जग्मुरदितिं च शशं[illegible]।२७। सर्वमेतन्मयाख्यातं भवतः कुरुनंदन। उरुक्रमस्य चरितं श्रोतॄणामघमोचनं॥२८॥
यो वक्ष्ये देयापानेन मार्गेण दि[illegible]तिवा।२९। एतच्चरितं सर्वसाराख्यानमिति विशेषोक्त्या अन्यान्यपि संतीत्युक्तं तानि तर्हि निः ४५
पे शेषाणि वर्णनीयानीत्याह[illegible]पारमिति। उरुवत्कुधा विक्रमतो विष्णोर्महिम्नः पारं यो गणनो भवति समर्त्यः पार्थिवानि र

तांस्य पि विममे गणितवान्। य [illegible] पार्थिवपरमाणुगणनमशक्तं तथा विष्णोर्गुणगणनमशक्यमित्यर्थः तथा च मंत्रः। विष्णोर्नुकं वीर्याणि इति। एतदेवमन्त्र [illegible] तार्थं स्तु वयन्नाह। यस्य पुरुषस्य महिम्नः पारं। तन्न दृष्टं ऋषि र्वशिष्ट इति एवमाह। कथं किं जायमानो जातो वा उपैति [illegible] न को पि इति वस्तु नं तत्रैवं नेवाहेत्यर्थः। तथा च मंत्रः। न ते विष्णो जायमानो न जातो देवमहिम्नः पारं मंतमाप इति। य इदं शृण्वन्नू भवति सपरां गतिं याति। सुकृतं यथा वत्कृतं विदुः। अष्टमे त्रयो विंशः।। ।चतुर्विंशे प्रसंगेन

पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः। किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृ

हि. रस्य२ षिः पुरुषस्य यस्य॥२९॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः। अवतारानुचरितं शृण्वन् याति परां गतिं॥३०॥ क्रियमाणे कर्मणीदं दैवे पित्र्ये थ मानुषे। यत्र यत्रानुकीर्त्तेत तत्तेषां सुकृतं विदुः॥३१॥ ॥इति श्रीभागवते महापुराणे अष्ट मस्कंधे वामनावतारचरिते त्रयोविंशोऽध्यायः॥२३॥ राजोवाच॥ भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः। अवता रकथामाद्यां मायामत्स्यविडंवनं॥१॥ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं। तमः प्रकृति दुर्मर्षं कर्मग्रस्त इवेश्व रः॥२॥ एतन्नो भगवन् सर्वं यथावद्वक्तुमर्हसि॥ उत्तमश्लोकचरितं सर्वलोकसुखावहं॥३॥ सूत उवाच॥ इत्युक्तो विष्णुरा तेन भगवान् बादरायणिः। उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं॥४॥ श्रीशुक उवाच॥ गोविप्रसुरसाधूनां छंदसा

मत्स्यरूपस्य शार्ङ्गिणः। लीलोच्यते यतः मत्स्यहतरक्षा महार्णवे॥१॥ तत्तं तत्तं निदर्शयामास निजेश्वर्यनिदर्शनात्। मत्स्यं प्रेक्षति त्र यीशो लीलया वामनोपमं॥२॥ मायया मत्स्यविडंवनं मत्स्यरूपानुकरणं यस्यां निरूप्यते॥१॥ ननु वस्मादकस्मादेवं मत्स्याव तारश्रवणेच्छा यज्ञीयामन्नस्तादृश्यादित्याह। यदर्थमिति द्वाभ्यां। दुर्मर्षं दुःसहं वलेरनुग्रहाय जुगुप्सितमपि याच करूपं धृतवा निति पुनस्तु कं। यदर्थं तु लोकजुगुप्सितं मत्स्यरूपमधारयत्। एतन्नो यथावद्वक्तुमर्हसीत्यर्थः। सामान्येनावतारप्रयोजनमाह॥ ४

भा० स्क० ९६

णेद्विषेतिरपुअक्षिततत्वं परिहरति। धियो गुणैर्यान्युच्चावचानि रूपाणि तेषु नियंतृत्वेन वर्त्तमानोपीश्वरो नो च्चावचत्वं भजते
निर्गुणत्वात्॥६॥ कुतः पुनः शुद्धसत्वमये मत्स्याद्याकारे रुच्चावचत्वशंकेति भावः विशेषतो मत्स्यावतारप्रयोजनमाह ६॥
आसीदिति त्रिभिः ब्रह्मणो निद्रायां भवो ब्राह्मस्तेनैव निमित्तेन जातो नैमित्तिकः समुद्रेणोपप्लुता निमग्नाः ७ अंतिके निःसृतान्
शफरीरूपं मत्स्यं। प्रयोजनानंतरं चलीलाप्रकारं चाह तत्र राजर्षिरित्यादि यावत्समाप्तिः स एव श्राद्धदेव इति ख्यातः॥११॥

मपि चेश्वरः। रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि॥५॥ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः। नोच्चावचत्वं भजते
निर्गुणत्वाद्धियो गुणैः॥६॥ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः। समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप॥७॥
कालेनागतनिद्रस्य धातुः शिशयिषोर्बली। मुखतो निःसृतान्वेदान्हयग्रीवोंतिकेहरत्॥८॥ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीव
स्य चेष्टितं। दधार शफरीरूपं भगवान्हरिरीश्वरः॥९॥ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान्। नारायणपरोतप्य
त्तपः स सलिलाशनः॥१०॥ योसावस्मिन्महाकल्पे तनयः स विवस्वतः। श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः॥११॥
एकदा कृतमालायां कुर्वतो जलतर्पणं। तस्यांजल्युदके काचिच्छफर्येकाभ्यपद्यत॥१२॥ सत्यव्रतोंजलिगतां सहतो
येन भारत। उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः॥१३॥ तमाह सातिकरुणं महाकारुणिकं नृपं। यादोभ्यो ज्ञाति
घातिभ्यो दीनां मां दीनवत्सल॥१४॥ कथं विसृजसे राजन्भीतामस्मिन्सरिज्जले॥१५॥ तमात्मनोनुग्रहार्थं प्रीत्या मत्स्यवपु
र्धरं। अजानन्रक्षणार्थाय शफर्याः स मनो दधे॥१६॥ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः। कलशाप्सु निधायैनां

कृतमालायां नद्यां। पश्चाहं तु त्वं निवसामि तदोकः स्थानं कल्पय। औदंचनोदके मणिकस्थे जले। रक्षोपायोगेनोपायेन यथा ९६
महाह्रदप्राप्तं जलं विनान शुष्मे यंतेनोपायेन निधेहि। अविदासिनि अनुपक्षये। तमितं तत्क्षणाशयपरिमितं सतं अभि

न

दयालुर्निन्य आश्रमं ७ सातु तत्रैकरात्रेण वर्द्धमाना कमंडलौ। अलब्ध्वात्मावकाशं वा इदमाह महीपतिं ~

वानसेत्र्प्रमितो व्याप्तवाञ्॥१७॥ ॥सुख्यःसत्कञ्आत्माख्यानिस्वञ्आमयः॥हेहे अरविंदाक्ष पृथगात्मनां देहाद्यभिमानि
नांसतामितरेषांचपादोपसर्प्पणंयथामृषाभवेत्॥ तथासर्वसुहृत्प्रियात्मनस्तवपादोपसर्प्पणंमृषानभवेत्॥यद्यस्मात्त्व
नाहंकमंडलावस्मिन्कृच्छ्रंवस्तुमिहोत्सहे।कल्पयौकःसुविपुलंयत्राहंनिवसेसुखं॥१८॥स [illegible] एनांतत त २
आदायन्यधादौदंचनोदके।तत्रक्षिप्तामुहूर्त्तेनहस्तत्रयमवर्द्धत॥१९॥नमएतदलंराजन्सुखंवस्तुमुदंचनं।पृथुदेहि
पदंमह्यंयत्वाहंशरणंगता॥२०॥ततआदायसाराज्ञाक्षिप्ताराजन्सरोवरे।तदावृत्यात्मनासोयंमहामीनोन्ववर्द्धत॥२१॥
नैतन्मेस्वस्तयेराजन्नुदकंसलिलौकसः।निधेहिरक्षायोगेनह्रदेमामविदासिनि॥२२॥इत्युक्तःसोनयन्मत्स्यंतत्रतत्रावि
५४ दासिने।जलाशयेसंमितंतंसमुद्रेप्राक्षिपज्झषं॥२३॥क्षिप्यमाणस्तमाहेदमिहमांमकरादयः॥अदंत्यतिबलावीरमां
नेहोत्स्रष्टुमर्हसि॥२४॥एवंविमोहितस्तेनवदतावल्गुभारतीं॥तमाहकोभवानस्मान्मत्स्यरूपेणमोहयन्॥२५॥नैवंवीर्यो
जलचरोदृष्टोस्माभिःश्रुतोपिवा।योभवान्योजनशतमह्नाभिव्यानशेशरः॥२६॥नूनंत्वंभगवान्साक्षाद्धरिर्नारायणो
व्ययः।अनुग्रहायभूतानांधत्सेरूपंजलौकसां॥२७॥नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्वर।भक्तानांनःप्रपन्नानांमुख्यो
ह्यात्मगतिर्विभो॥२८॥सर्वेलीलावतारास्तेभूतानांभूतिहेतवः।ज्ञातुमिच्छाम्यदोरूपंयदर्थंभवताधृतं॥२९॥नतेरविंदाक्ष
पादोपसर्प्पणंमृषाभवेत्सर्वसुहृत्प्रियात्मनः।यथेतरेषांपृथगात्मनांसतामदीदृशो [illegible] यद्वपुरद्भुतंहिनः॥३०॥श्रीशुक
उवाच॥इतिब्रुवाणंनृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये।विहर्तुकामःप्रलयार्णवेब्रवीच्चिकीर्षुरेकांतजनप्रियःप्रियं ३१

दृश्या: [illegible]द्भुतंवपुरदीदृशःदर्शितवानसिपरमेतरेषांपृथगात्मनोयेदर्शिनःपुंसःअसतांपरिछिन्नानांपदोपसर्प्पणंमृषात्यर्थः
[illegible]

एकांतजनानां [illegible] प्रियायस्य अपदां भोधौ प्रलयार्णवे भूर्भुवआदिकमित्यर्थः।संवत्संभिसिप्रलयोदकल्पामुपस्थास्यतिशास्यतिस्व

चिकीर्षितमेकांतजनप्रियः अनु ?

भा० स्कं० ...ऋषीः आशये निःशेषः ऋषीणामेवालोकेन विचरिष्यसि मे मया अनुग्रहीतं प्रसादीकृतं हृदि अपरोक्षं वेत्स्यसि त्वयाक्त
४७ श्रीभगवानुवाच। सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम। निमज्जत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं॥३२॥ त्रिलोक्यां ली
यमानायां संवर्तांभसि वै तदा। उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता॥३३॥ त्वं तावदोषधीः सर्वा बीजान्युच्चा
वचानि च। सप्तर्षिभिः परिवृतः सर्वसत्वोपबृंहितः॥३४॥ आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः। एकार्णवे निरा
लोके ऋषीणामेव वर्चसा॥३५॥ दोधूयमानां तां नावं समीरेण बलीयसा। उपस्थितस्य मे शृंगे निबध्नीहि महाहिना
॥३६॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति। विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो॥३७॥ मदीयं महिमानं च त्यये
परं ब्रह्मेति शब्दितं। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि॥३९॥ इत्थमादिश्य राजानं हरिरंतरधीयत। सोन्ववैक्षत तं
कालं यं हृषीकेश आदिशत्॥४०॥ आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः। निषसाद हरेः पादौ चिंतय
न्मत्स्यरूपिणः॥४१॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं। वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत॥४२॥ ध्याय
न्भगवतो रूपं ददृशे नावमागतां। तामारुरोह विप्रेंद्रैरादायौषधिवीरुधः॥४३॥ तमूचुर्मुनयः प्रीता राजन्ध्या
यस्व केशवं। स वै नः संकटादस्मादविता शं विधास्यति॥४४॥ सोनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे। एकशृं
गधरो मत्स्यो हैमो नियुतयोजनः॥४५॥ निबध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा। वरत्रेणाहिना तुष्टस्तुष्टाव मधुसू ४२
दनं॥४६॥ ॥ राजोवाच॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः॥ ॥ ॥ ॥ ॥ ४७

तैः संप्रश्नैः मया विवृतं संतं। वरत्रेण डोरकरूपेण॥४६॥ ।सागरं तारयिष्यं तं तरिष्यत्रिव सागरं॥ सत्यव्रतो गुरुत्वेन तुष्टा
व हरिमष्टभिः। अत्रेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वेति तत्र तावत्। यावद्ब्राह्मी निशेत्यादुत्स्पोक्तेरखुपपन्नो यच्चोक्त

ब्राह्मोलय इति। योसावस्मिन्महाकल्प इति चोक्तेर्महाप्रलय इति प्राप्ते नेति भ्रमः। महाप्रलये पृथिव्यादीनामवशेषा
संभवात्। यावद्ब्राह्मी निशेत्यायुक्तिविरोधाच्च। अतो दैनंदिन इति युक्तं। नचैतदपि संगच्छते॥ संवर्तकेत्यादिभिर्वि
नोदभवस्मादेवसत्यव्रतमेष्यति त्रैलोक्यं निमङ्क्ष्यति इत्यत्र मत्स्योक्तेरनुपपन्नं। यच्चोक्तं प्रथमस्कंधे रूपं च जगृहे मात्स्यं चाक्षुषां
तरसंप्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमिति। तदापि तदा दुर्घटं। नहि प्रलयद्वयेपि महीमय्यां नावारोहः
संभवति। नचाक्षुषमन्वंतरे प्रलयोस्ति। तथा वसति सप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं। नहि प्रलयद्वयेपि महीम
य्यात्त्वंतावदोषधीः सर्वा इत्यादिनिर्देशोपि न संगच्छते। नहि तदा ओषधीनां सत्वानां चावशेषः संभवति। तस्माद
न्यथा वर्णयति नैवायं वास्तवः कोपि प्रलयः किंतु सत्यव्रतज्ञानोपदेशाय विभ्रमितो भगवान् वैराग्यार्थं कस्मात्प्रलयमि

यद्रूपेहोपसृताय मा मुमुक्षोर्विमुक्तिदो नः परमो गुरुर्भवान्॥४६॥ जनोबुधोयं निजकर्मबंधनः सुखेच्छया कर्म

वद्दर्शयामास यथास्मिन्नेव वैवस्वतमन्वंतरे मार्कंडेयाय दर्शितवान्। तद्रूपेस्मिन्नेव महाकल्पेस्मिन्निति विशेषणं संगच्छ
ते। तथा चाततः समुद्र उद्वेलः सर्वतः समहस्पतेति तस्यैव तथा दर्शनमुक्तमित्येषा दिक्। प्रस्तुतं स्तोत्रं व्याख्यास्यामः। तत्र
नानायोनिषु संसरतः स्वस्य भगवतः प्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते। अनादीत्यत्र अविद्यातया उपहता आवृता आत्म
संविद्रूपा यैस्ते अत एवाविद्यामूलैः संसारपरिश्रमैरातुराः इह संसारे यदृच्छया यदनुग्रहाद्देवकउपस्थिताः संतो यं प्राप्नुयुः
स भवानेव मान्त्वान्नो गुरुः। मुमुक्षोर्विमुक्तिदो ग्रंथिभिंद्यादित्युत्तरेणान्वयः॥४६॥ ननु वैराग्यं विना कुतो मुक्तिः तर्हि तस्य वक्तव्यैव क
फलत्वात्तदेवामादिशेत्याशयेनाह। अबुधोयं जनः असुखं यथा भवति तथा कर्म समीहिते तां सुखेच्छां नो हृदयग्रंथिं सांनि
ध्यात् इत्युत्तरेणान्वयः। यतः स परो गुरुः। ननु यज्ञदानादिभिः सत्वशुद्धिं विना कथं ग्रंथिभेदः स्यात्तत्राह॥ श्रीराम

सेवयैव पुमानात्मनो मनसो मलं तमो विजह्यात् । एवं प्रहीनमलः निजवर्णं स्वस्वरूपं भजेत । स ईशो नो गुरुः । महानोह
रुद्ररोदीदिति रुद्रस्य रुद्ररोदनं रजतं । यद्रोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रु अशीर्यत तद्रजतं हिरण्यमभवदिति श्रुतेः । तद्य
थाग्निसंपर्कान्मलं जहाति स्ववर्णं भजते न तु क्षालनादिभिः तथा न यज्ञादिभिर्मलत्यागः । किं तु त्वत्सेवयैव तेषां तु सेवांगत्व
परमगुरुत्वं च प्रपंचयन्नाह । यत्प्रसादस्यायुतभागस्तस्य लेशो मात्रमपि अन्ये देवादयः सर्वे समेता अपि स्वयं तं निरपेक्षाः
२१

समीहिते सुखं । यत्सेवयातो विधुनोत्यसन्मतिं ग्रंथिं सभिंद्यात् हृदयं स नो गुरुः ॥४७॥ यत्सेवयाग्नेरिव रुद्ररोदनं
पुमान्विजह्यान्मलमात्मनस्तमः भजेत वर्णं निजमेष सोऽव्ययो भूयात्स [illegible] ईशः परमो गुरोर्गुरुः ॥४८॥ न यत्प्रसादायु
तभागलेशमन्ये च देवा गुरवो जनाः स्वयं कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥४९॥ अचक्षुरंधस्य
यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभूत्सतां ॥५०॥
जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः । त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं
५१ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः । तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः
५२ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय छिंध्यर्थदीपैर्भगवान् वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ॥५३

संतः कर्तुं न भवंति । तदेव दृष्टांतेन स्पष्टयन्नाह । अचक्षुरिति । अविदुषो जनस्य अबुधोऽविद्वान् गुरुस्तथैव । अर्कप्रकाशवत्त्व
त एव ज्ञानं यस्य सः अर्कदृक् अतः सर्वदृशां सर्वेषां दृष्टीनां समीक्षः प्रकाशकः । अत एव स्वगतिं बोद्धुमिच्छद्भिः नोऽस्माभिर्गुरुर्वृतोऽसि ४८
किंच प्राकृतो गुरुरनर्थहेतुरित्याह । जन इति । आदिशते उपदिशति । असतीं मतिं अर्थकामादिमिति । तमः संसारं । त्वं तु तर्हि
सर्वोऽपि लोको मामेव किं नोपसरति । अज्ञानादित्याह । त्वमिति । प्रियेश्वरः अहं तु त्वामेव शरणं यामीत्याह । प्रतिबोधनाय

परेशाय अर्थदीपैः परमार्थप्रकाशकैः हृदये भवान् ग्रंथीन् अहंकारादीन् छमोक्षः स्वरूपं विशुद्धप्रका[illegible]
ति। पुराणसंहितां मत्स्यपुराणसंहितां मत्स्यपुराणं अशेषतः अब्रवीदित्यनुषंगः॥५३॥ ।योयं ह[illegible]

श्रीशुक उवाच। इत्युक्तवंतं नृपतिं भगवानादिपूरुषः। मत्स्यरूपी महांभोधौ विहरंस्तत्वमब्रवीत्॥५४॥ पुराणसंहितां
दिव्यां सांख्ययोगक्रियावतीं। सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः॥५५॥ अश्रौषीदृषिभिः साकमात्मतत्वमसंशयं। ना
व्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं॥५६॥ अतीतप्रलयापाय उत्थिताय स वेधसे। हत्वासुरं हयग्रीवं वेदान्प्रत्याहर
द्धरिः॥५७॥ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः। विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः॥५८॥ सत्य
व्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः। संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात्॥५९॥ अवतारो हरेर्यो
यं कीर्त्तयेदन्वहं नरः। संकल्पास्तस्य सिध्यंति स याति परमां गतिं॥६०॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः
श्रुतिगणमपनीतं प्रत्युपादाय हत्वा। दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोस्मि॥ यता
ंघ्रिपद्ममकरंदमयं दभाग्याः संतो भजंति न मंदभाग्याः नारायणः स निजपादरजोभिमृष्टं मुच्छिन्न[illegible]र्पणेन तलं वि
मलं करोतु॥६२॥ ।इति श्रीभागवते महापुराणे अष्टमस्कंधे परमहंस्यां संहितायां भगवन्मत्स्यावतारचरितानुवर्ण
नेचतुर्विंशोध्यायः॥२४॥ ॥

येतात्यतीतः पूर्वीयः प्रलयः तस्यापाये अवसाने। सत्यव्रतस्य ऋषीणां च। ज्ञानं गच्छंति इति च लिंगं समवायाद्बहुवचनं। राम
जिह्ममीनं मायामत्स्यं। ॥इति श्रीभागवते भावार्थदीपिकायां श्रीधरस्वामिविरचितायां अष्टमस्कंधे चतुर्विंशोध्यायः॥ ९८
[illegible]शाके कार्तिकमासे कृष्णपक्षे [illegible] शनिवारे। इदं पुस्तकं लिखितं [illegible] रामभक्त दीर्घपुरमध्ये॥ श्रीरामायनमः॥